साहित्य-सेवक-सदनकी प्रथम स्तम्भ

जिन-पूजन-संग्रह

—:※०※—

सञ्चयिता व सम्पादक—
विनयकुमार 'चौधरी' साहित्य-रत्न
सा० शास्त्री, काव्यतीर्थ

—:०:—

—प्रकाशक—
चौधरी मथुरा प्रसाद जैन
स्थान--बड़ा गांव, पो० बुडेरा
(टीकमगढ़ वि० प्र०)

—(:०:)—

प्रथमवार	दीप मालिका	मूल्य
५००	वीर० नि० २४७७	सवा रुपया १।)

मुद्रक—चन्द्र प्रिंटिंग प्रेस, नया बाजार, दिल्ली ।

स्मरण

जिन के शत-शत उपकारों की याद कभी नहीं भूल सकती, जिनकी धार्मिकता एवं सहृदयता आज भी मेरे हृदय में साकार रूप लिये हुये विराजमान है एवं जिन्होंने अपने पवित्र स्नेह की धारा मेरे हृदय में प्रवाहित की, उन स्वर्गीय पूज्य पिता **चौ० रघुनाथ प्रसाद जी** की पवित्र श्रद्धा भरी याद में—

मथुरा प्रसाद जैन

आमुख

—:o:—

देवपूजा गुरूपास्ति स्वाध्यायः संयमस्तपः।
दानं चेति गृहस्थानां षट्कर्माणि दिने दिने ॥

देवपूजा, गुरुउपासना, स्वाध्याय, संयम तप और दान—गृहस्थको ये षट्कर्म—छः कर्तव्य कार्य प्रतिदिन करनेको वतलाये गये हैं। इन छः कर्तव्योंकी ओर यदि हम गहरी दृष्टि डालें तो कहना पड़ेगा कि इनके अतिरिक्त गृहस्थके लिए कोई कर्तव्य रह ही नहीं जाता। पूरे नागरिक शास्त्रकी शिक्षाएं, धार्मिक शास्त्रोंके उपदेश इसी उपदेशवाक्यमें गर्भित हो जाते हैं।

प्रस्तुत उपदेश वाक्यके प्रणेताने सबसे प्रथम देवपूजनको ही ग्रहण किया है। यह इसलिये कि यही सबका आधारभूत है। देव वचनोंसे ही सम्यग्गुरुकी पहचान होती है; 'स्व' का ज्ञान भी देव-पूजासे ही अपेक्षित है। 'स्व' की जिन्होंने पूर्णरूपसे उपलब्धि करली है, ऐसे देवरूप आदर्शमें ही तो हम अपने 'स्व' का प्रतिबिम्ब देख सकते हैं। फिर संयम, तप और दानकी परिणति देव-पूजा से ही होती है। इस तरह देवपूजाकी प्रधानता अपना औचित्य रखती है।

देव-पूजासे तात्पर्य यह कि परमात्माका गुण-स्तवन करना, भक्ति करना उसमें अपनी श्रद्धाको दृढ़ रखना, आदर और भक्तिसे उस आप्त—परमात्माको नमस्कार-वन्दन करना और उसके गुणों की प्राप्तिकी कामना करना — आदि आदि।

वह पूजन पूजन नहीं होगी जिसमें भक्तिकी रसधारा

प्रवाहित न हो, भावोंमें सरसता न हो, पूज्य प्रभुके प्रति अगाढ़ श्रद्धा न हो, उसके गुणोंके प्रति आकर्षण न हो, और बिना किसी लौकिक आकांक्षाके उस प्रभुका अवलोकन कर जिसमें हृदय की कलियां खिल न उठें। वह तो होगा केवल दम्भ और झूठा लोक दिखावा—भाव हीनकी क्रियायें सदैव निष्फल रहती हैं। अतएव भावहीन पूजासे कोई लाभ नहीं। भक्ति हमारे हृदयका वह सागर है जो प्रभुका आलम्बन पा उद्वेल्लित हो उठता है वही भक्ति सागरका रस हमारी भावनाओंको आर्द्र बना देता है जिससे वे सरस भावनाएं शुभ कार्योंकी ओर परिणत होती हैं तब परिणामों में एक प्रकार की नमी और ऋजुता आ जाती है फल स्वरूप पूज्यके गुणोंकी उपलब्धि अति सुलभ बन जाती है।

अब प्रश्न रह जाता है पूज्य कौन है! इसका खासा समाधान तो यही है; कि 'यो हि यद्गुणलब्ध्यर्थी स तं वन्द्यमानो दृष्ट.' जो जिसके गुणोंकी चाह करता है वह उसके लिए पूज्य है—वन्दनीय है, स्तुत्य है वैसे तो—

'अनपेक्षितार्थवृत्तिः कः पुरुषः सेवते नृपतीन्' की नीति सर्वत्र ही लागू है। चूंकि हम परमात्माके गुणोंकी कामना करते हैं इसलिए परमात्मा हमारे लिए पूज्य है, वन्दनीय एवं स्तुत्य हैं—हमें दृढ़ विश्वास है कि अपने वन्दनीय देवकी वन्दना-स्तुतिसे उसके गुणोंकी प्राप्ति हमें अवश्य होगी; आत्माके जिन अनन्त गुणोंका वह भोग कर रहा है, वे गुण हमें उसकी उपासनासे अवश्य उपलब्ध होंगे अतः हम उसकी वन्दना-स्तुति-पूजन-भक्ति करते हैं—

'श्रेयोमार्गस्य संसिद्धिः प्रसादात्परमेष्ठिनः'

अर्थात्—कल्याण-मार्गकी प्राप्ति परमेष्ठी भगवानके प्रसादसे

निश्चित ही प्राप्त होती है।

अब रह जाता है परमात्माका स्वरूप सो—

वह परमात्मा जैन तत्वकी दृष्टिसे आत्माके पूर्ण विकासकी अवस्थाका नाम है। अनादिकालसे यह आत्मा कर्ममलसे दूषित होकर तीनों लोकोंमें संसरण करता है और आत्मतत्त्वसे अपरिचित रह कर नाना तरहके संसरण जन्य दुख भोगता है; जीवकी इस अवस्थाका नाम 'जीवात्मा' या बहिरात्मा है। परन्तु जब वही जीव-अपने भीतर सदैव जागृत रहने वाले, परन्तु कर्मावरणसे आवृत अपने आत्मतत्त्वसे परिचित होने लगता है तो कर्मोके आवरणको दूर करनेका प्रयत्न करता है इस प्रयत्न करनेकी अवस्थाका नाम 'अन्तरात्मा' है। जब कर्मोका पर्दा धीरे धीरे झीना-झीना होकर बिल्कुल नष्ट हो जाता है उस समय आत्माकी अनन्त अप्रकट शक्तियां पूर्णतया प्रकट होकर दमकने लगती हैं—इसी आत्यन्तिक विशुद्ध अवस्थाका नाम 'परमात्मा' है, जिसे हम परमेष्ठी सर्वज्ञ, जिन, अर्हन्, आप्त आदि नामोंसे पुकारते है।

इस तरह जब आत्माकी पूर्ण विकसित अवस्थाका नाम परमात्मा है तो किसको यह अभिप्रेत नही कि वह भी अधूरा न रहे—पूर्ण बन जावे—परमात्मा बनजावे—अनन्त दर्शन, अनन्त ज्ञान, अनन्त वीर्य और अनन्त सुखस्वरूप निज वृत्तिका पूर्णानुभवन करे।

यह बात अनुभव गम्य है कि परमात्मपदकी प्राप्तिके लिये परमात्माका ध्यान, परमात्माके गुणोंका स्मरण, चिन्तन और उसके अलौकिक चरित्रके स्वरूपका विचार करना परमावश्यक है; क्योंकि वह ध्यान, चिन्तवन, स्मरण हमको अपनी आत्माकी स्मृति दिलाता है—हमें आत्मतत्वसे परिचित होनेमें सहायता करता है तब अपनी अवस्थाका बोध होकर 'कोऽहं को मम धर्मः किं करणीयं

स्वात्मलब्धये' का विकल्प मात्र सामने रह जाता है और हल भी दूर नहीं दिखाई देता—

मोक्षमार्गस्य नेत्तारं भेत्तारं कर्मभूभृताम्।
ज्ञातारं विश्वतत्त्वाना वन्दे तद्गुणलब्धये ॥

पूज्यपाद स्वामीके इस मंगलाचरणात्मक श्लोकसे मिल जाता है, जिसमें उन्होंने हितोपदेशी, वीतराग और सर्वज्ञदेवको उसके गुणोंकी प्राप्तिके लिये नमस्कार करनेकी प्रतिज्ञा की है। वास्तवमें उसके गुणोंकी प्राप्ति अपने गुणोंकी प्राप्ति ही है; क्योंकि विश्वकी अनन्तानन्त आत्माएँ ज्ञान—दर्शनादि गुण विशिष्ट निजरूपसे समान है। प्रथक्त्व तो परपुद्गल जनित है, जो निजका तत्त्व नहीं किन्तु आत्म तत्त्वके प्रकाशमें केवल बाधक ही है—जब विश्वकी सब आत्माएँ समान हैं तो उनके अन्दर विद्यमान अनन्त चतुष्टय रूप शक्तियां भी समान है। और जिन विशुद्ध गुणोंकी उपलब्धि परमात्मामें हम पा रहे हैं वे गुण हममें भी होने चाहिये। उनकी प्राप्तिके लिये ही भगवान् परमात्माको एक आदर्शरूप मान करके उसे हम नमस्कार—वन्दना करते हैं। जिस तरह एक दर्पणमें हम अपना मुख ज्यो का त्यों देख लेते है—परमात्मारूप दर्पणमें हम अपने अन्दर छिपे रहने वाले अनन्त गुणोंको देखनेके लिये समर्थ होते हैं। दर्पणके उपकारके समान ही भगवान् हमारे उपकारक है। वैसे तो वे वीतरागी होनेके कारण न किसीका अहित करते हैं और न हित ही करते हैं। न वे भक्तपर प्रसन्नता प्रकट करते हैं और न स्वप्रतिकूल जनपर द्वेष ही प्रकट करते हैं।

न पूजयार्थस्त्वयि वीतरागे न निन्दया नाथ विवान्तवैरे।
नथापि ते पुण्य गुणस्मृतिर्न पुनाति चित्तं दुरिताञ्जनेभ्यः ॥

भगवान् वीतरागी हैं—रागका एक अंश भी उनकी आत्मामें

विद्यमान नहीं है अतएव रागका अभाव होनेके कारण द्वेषका भी लेष उनके नहीं है क्योंकि द्वेषको उत्पन्न करने वाला राग ही है— इष्टमें रहने वाला राग अनिष्टमें द्वेष उत्पन्न कर देता है। इसलिए इष्टमें रागके अभावसे अनिष्टमें द्वेषका अभाव निश्चित है— राग-द्वेषसे रहित भगवान ! आपको न तो कोई पूजन अर्चनसे मतलब है और न निन्दा गर्हा से कोई चोभ है, तो भी हे भगवान ! आपके पुण्य गुणोंकी स्मृति—अथच स्वात्म गुणोंकी आपसे होने वाली स्मृति—मानव हृदयोको पापोंसे बचाकर पवित्र करती है।

तात्पर्य कि भगवानके अर्चन-वन्दन-स्तवनादिसे भगवद्‌गुणों की प्राप्ति होती है जो कि हमें अभिप्रेत हैं अतएव उनकी पूजन, वन्दन, स्तुति करना हमें लाजिमी है। जिस तरह मयूरकी सामी-प्यतासे चन्दन वृक्षोंके भुजङ्ग बन्धन स्वयं ढीले पड़ जाते हैं, ठीक उसी तरह भगवानको सभक्ति हृदयमें धारण करनेसे उनके गुणोंका स्मरण-चिन्तन करनेसे हम प्राणियोंके कर्म बन्धन अपने आप शिथिल पड जाते हैं। यही उनके स्तवन, अर्चन, गुण-चिन्तन का फल है—

> हृद्वर्तिनि त्वयि विभो ! शिथिली भवन्ति
> जन्तो क्षणेन निविडा अपि कर्मबन्धाः ।
> सद्यो भुजङ्गममया इव मध्यभाग-
> मभ्यागते वन शिखण्डिनि चन्दनस्य ॥
>
> —कल्याणमन्दिर-स्तवन

भगवत्पूजनसे कर्मबन्धन तो दूर होता ही है, लौकिक ऐश्वर्य सम्पदाकी प्राप्ति भी उससे मिल जाती है जिस तरहसे एक किसान को अपनी खेतीसे धान्य प्राप्तिके साथ २ भूसेकी प्राप्ति हो जाती हैं। परन्तु इससे हम यह सोचे कि भगवान हमसे प्रसन्न होकर हमें

इनके लाभ के लिये आशीर्वाद देते होंगे तब तो बात गलत रहेगी, कारण कि वे तो वीतरागी है, प्रसन्न होना तो वीतरागतामें बाधक है। लाभका कारण तो केवल यह है कि परमात्माके गुणानुराग से, उनकी भक्ति, ध्यान, चिन्तवन दर्शनसे उनकी वीतरागमयी मूर्तिका प्रतिबिम्ब हमारी आत्मापर पड़ता है और उनकी सी शान्तिका सञ्चार हमारी आत्मामें भी होने लगता है, तब शुभ परिणामोंकी वृद्धि होती है। इस तरह हमारी पुण्य प्रकृतियोंका रस बढ़ने लगता है और पाप प्रकृतियोंका रस सूखने लगता है चूंकि अन्तराय कर्मकी प्रकृतियां भी पापरूप हैं इसलिए वे भी सूखने लगती है, भग्न रस होकर वे पापप्रकृतियां हमारे लाभ, भोग उपभोग और वीर्यको बाधा देनेकी सामर्थ्य नहीं रख पातीं अतएव हमें ऐहिक पदार्थोंकी प्राप्ति हो जाती है—

नेष्टं विहन्तुं शुभभावभग्न रसप्रकर्षः प्रभुरन्तरायः।
तत्कामचारेण गुणानुरागनुत्यादि रिष्टार्थकदार्हदादेः॥

इस तरह भगवत्पूजन, स्तुति वन्दनादिसे हमें अपने आत्म-गुणोंकी प्राप्ति और ऐहिक सुखोंकी उपलब्धि भी अप्रत्यक्ष रूपसे मिल जाती है इसीलिए गृहस्थ के ६ कर्तव्योंमें देव पूजनको प्रधानता दी गई है। यदि हम अपनी आत्म चेतनाको जागृत करना चाहते हैं तो हमें आवश्यक है कि हम भक्तिभाव-पूर्वक अपने इष्ट देवकी अर्चना, वन्दना करें।

आजकल अष्ट द्रव्य चढ़ानेको ही जिन पूजनकी प्रथा सी है पर स्तुति, वन्दना नमस्कार, आदि बिना द्रव्य चढाये भी पूजन कहला सकते हैं। प्रचलित पूजन पद्धतिमें भगवानके मन्दिरमें भी स्थापना और विसर्जन आदि क्रियायें विचारणीय हैं, जिनका उत्तर विद्वान् लोग देंगे।

—विजय कुमार चौधरी

जिन-पूजन-संग्रह

ॐ जय जय जय । ॐ नमोऽस्तु नमोऽस्तु नमोऽस्तु ।
णमो अरहंताणं, णमो सिद्धाणं णमो आइरीयाणं ।
णमो उवज्झायाणं णमो लोए सव्वसाहूणं ॥१॥
मन्त्रं संसारसारं त्रिजगदनुपमं सर्वपापारिमन्त्रम्,
संसारोच्छेदमन्त्रं विषमविषहरं कर्मनिर्मूलमन्त्रम् ।
मन्त्रं सिद्धिप्रदानं शिवसुखजननं केवलज्ञानमन्त्रम्
मन्त्रं श्रीजैनमन्त्रं जप जप जपितं जन्मनिर्वाणमन्त्रम् ॥२॥
आकृष्टिं सुरसम्पदां विदधते मुक्तिश्रियोवश्यता-
मुच्चाटं विपदां चतुर्गतिभुवां विद्वेषमात्मैनसाम् ।
स्तम्भं दुर्गमनं प्रति प्रयततो मोहस्य सम्मोहनम्,
पायात्पञ्चनमस्क्रियाक्षरमयी साराधना देवता ॥३॥
अनन्तानन्तसंसारसन्ततिच्छेदकारणम् ।
जिनराजपदाम्भोजस्मरणं शरणं मम ॥४॥
दर्शनं देव-देवस्य दर्शनं पापनाशनम् ।
दर्शनं स्वर्गसोपानं दर्शनं मोक्षसाधनम् ॥५॥
दर्शनेन जिनेन्द्राणां साधूनां वन्दनेन च ।

न चिरं तिष्ठते पापं, छिद्रहस्ते यथोदकम् ॥६॥

वीतरागमुखं दृष्ट्वा, पद्मरागसमप्रभम् ।
अनेकजन्मकृतं पापं, दर्शनेन विनश्यति ॥७॥

दर्शनं जिनसूर्यस्य, संसारध्वान्तनाशनम् ।
बोधनं चित्तपद्मस्य, समस्तार्थप्रकाशनम् ॥८॥

दर्शनं जिनचन्द्रस्य, सद्धर्मामृतवर्षणम् ।
जन्मदाहविनाशाय वर्धनं सुखवारिधेः ॥९॥

जीवादितत्त्वप्रतिपादकाय, सम्यक्त्वमुख्याष्टगुणाश्रयाय ।
प्रशान्तरूपाय दिगम्बराय, देवाधिदेवाय नमो जिनाय ॥१०॥

चिदानन्दैकरूपाय जिनाय परमात्मने ।
परमात्मप्रकाशाय, नित्यं सिद्धात्मने नमः ॥११॥

अन्यथा शरणं नास्ति, त्वमेव शरणं मम ।
तस्मात्कारुण्यभावेन, रक्ष रक्ष जिनेश्वर ॥१२॥

नहि त्राता नहि त्राता, नहि त्राता जगत्त्रये ।
वीतरागात्परो देवो न भूतो न भविष्यति ॥१३॥

जिनेभक्तिर्जिनेभक्ति, र्जिनेभक्तिर्दिनेदिने ।
सदा मेऽस्तु सदा मेऽस्तु, सदा मेऽस्तु भवे भवे ॥१४॥

जिनधर्मविनिर्मुक्तो, मामवच्चक्रवर्त्यपि ।
स्याच्चेटोऽपि दरिद्रोऽपि, जिनधर्मानुवासितः ॥१५॥

जन्मजन्मकृतं पापं, जन्मकोटिमुपार्जितम् ।
जन्ममृत्युजरारोगं, हन्यते जिनदर्शनात् ॥१६॥

अद्याभवस्सफलता नयनद्वयस्य,
देव त्वदीयचरणाम्बुजवीक्षणेन ।
अद्य त्रिलोकतिलक प्रतिभासते मे ।
संसारवारिधिरयं चुलकप्रमाणम् ॥१७॥

चत्तारि मंगलं—अरहंता मंगलं, सिद्धा मंगलं, साहू मंगलं, केवलिपण्णत्तो धम्मो मंगलं ॥१॥

चत्तारि लोगुत्तमा—अरहंता लोगुत्तमा, सिद्धा लोगुत्तमा, साहू लोगुत्तमा, केवलिपण्णत्तो धम्मो लोगुत्तमा ॥२॥

चत्तारि शरणं पव्वज्जामि—अरहंते सरणं पव्वज्जामि सिद्धे सरणं पव्वज्जामि, साहूसरणं पव्वज्जामि, केवलि-पण्णत्तं धम्मं सरणं पव्वज्जामि ॥३॥

वृषभ- अजित- संभव- अभिनन्दन-सुमति- पद्मप्रभ - सुपार्श्व- चन्द्रप्रभ- पुष्पदन्त- शीतल- श्रेयान्- वासुपूज्य - विमल - अनन्त - धर्म - शान्ति - कुन्थु - अर - मल्लि - मुनिसुव्रत - नमि - नेमि - पार्श्व - वर्धमानाश्चेति

(वीर, महावीर, सन्मति, अतिवीर) वर्तमानकाल सम्बन्धिचतुर्विंशतीर्थकरेभ्यो नमोनमः ॥

सुप्रभातस्तोत्रम् ।

यत्स्वर्गावतरोत्सवे यदभवज्जन्माभिषेकोत्सवे,
यद्दीक्षाग्रहणोत्सवे यदखिलज्ञानप्रकाशोत्सवे ।
यन्निर्वाणगमोत्सवे जिनपतेः पूजाद्भुतं तद्भवै-
संगीतस्तुतिमंगलैः प्रसरतां मे सुप्रभातोत्सवः ॥१॥

श्रीमन्नतामरकिरीटमणिप्रभाभि
राजीढपाद युग ! दुर्धरकर्मदूर ।
श्रीनाभिनन्दन ! जिनाजितशंम्भवाख्य !
त्वद्ध्यानतोऽस्तु सततं मम सुप्रभातम् ॥२॥

छत्रत्रयप्रचलचामरवीज्यमान
देवाभिनन्दनमुने सुमते जिनेन्द्र ।
पद्मप्रभारुणमणिद्युतिभासुराङ्ग
त्वद्ध्यानतोऽस्तु सततं मम सुप्रभातम् ॥३॥

अर्हन् सुपार्श्व कदलीदलवर्णगात्र
प्रालेयतारगिरिमौक्तिकवर्णगौरम् ।

चन्द्रप्रभस्फटिकपाण्डुरपुष्पदन्त !
त्वद्ध्यानतोऽस्तु सततं सुप्रभातम् ॥४॥
संतप्तकांचनरुचे जिनशीतलाख्य !
श्रेयान्विनष्टदुरिताष्टकलङ्कपङ्क
बन्धूकबन्धुररुचे जिनवासुपूज्य !
त्वद्ध्यानतोऽस्तुसततं मम सुप्रभातम् ॥५॥
उद्दण्डदर्पकरिपोविमलामलाङ्ग
स्थेमन्ननन्तजिदनन्तसुखाम्बुराशे ।
दुष्कर्मकल्मषविवर्जितधर्मनाथ
त्वद्ध्यानतोऽस्तु सततं मम सुप्रभातम् ॥६॥
देवामरीकुसुमसन्निभशान्तिनाथ !
कुन्थोदयागुणविभूषणभूषितांग !
देवाधिदेव भगवन्नरतीर्थनाथ, ।
त्वद्ध्यानतोऽस्तुसततं मम सुप्रभातम् ॥७॥
यन्मोहमल्लमदभंजनमल्लिनाथ !
क्षेमंकराविनथशासनसुव्रताख्य !
यत्सम्पदाप्रशमितो नमिनामधेय
त्वद्ध्यानतोऽस्तु सततं मम सुप्रभातम् ॥८॥
तापिच्छगुच्छरुचिरोज्ज्वलनेमिनाथ
घोरोपसर्गविजयिन् जिनपार्श्वनाथ ।

स्याद्वादसूक्तिमणिदर्पण वर्द्धमान
त्वद्ध्यानतोऽस्तु सततं मम सुप्रभातम् ॥९॥

आलेयनीलहरितारुणपीतभासम्
यन्मूर्तिमव्ययसुखावसथं मुनीन्द्राः ।
ध्यायन्ति सप्तति शतं जिनवल्लभानां
त्वद्ध्यानतोऽस्तु सततं मम सुप्रभातम् ॥१०॥

सुप्रभातं सुनक्षत्रं मांगल्यं परिकीर्तितम् ।
चतुर्विंशतितीर्थानां सुप्रभातं दिनेदिने ॥११॥

सुप्रभातं सुनक्षत्रं श्रेयः प्रत्यभिनंदितम् ।
देवता ऋषयः सिद्धाः, सुप्रभातं दिने दिने ॥१२॥

सुप्रभातं तवैकस्य वृषभस्य महात्मनः ।
येन प्रवर्तितं तीर्थं भव्यसत्वसुखावहम् ॥१३॥

सुप्रभातं जिनेन्द्राणां ज्ञानोन्मीलितचक्षुषाम् ।
अज्ञानतिमिरान्धानां नित्यमस्तमितो रविः ॥१४॥

सुप्रभातं जिनेन्द्रस्य वीरः कमललोचनः ।
येनकर्माटवी दग्धा शुक्लध्यानोग्रवह्निना ॥१५॥

सुप्रभातं सुनक्षत्रं सुकल्याणं सुमङ्गलम् ।
त्रैलोक्यहितकर्तॄणां जिनानामेव शासनम् ॥१६॥

मंगलाष्टकम्

श्रीमन्नम्रसुरासुरेन्द्रमुकुटप्रद्योतरत्नप्रभा-

भास्वत्पादनखेन्दवः प्रवचनाम्भोधीन्दवः स्थायिनः ।

ये सर्वे जिनसिद्धसूर्यनुगतास्ते पाठकाः साधवः,

स्तुत्या योगिजनैश्च पञ्च गुरवः कुर्वन्तु ते मङ्गलम् ॥१॥

सम्यग्दर्शनबोधवृत्तममलं रत्नत्रयं पावनम्,

मुक्तिश्रीनगराधिनाथजिनपत्युक्तोपवर्गप्रदः ।

धर्मः सूक्तिसुधाच चैत्यमखिलं चैत्यालयश्च्यालयम्,

प्रोक्तं च त्रिविधं चतुर्विधममी कुर्वन्तु ते मङ्गलम् ॥२॥

नाभेयादिजिनाधिपास्त्रिभुवनख्याताश्चतुर्विंशति

श्रीमन्तो भरतेश्वरप्रभृतयो ये चक्रिणो द्वादश ।

ये विष्णुप्रतिविष्णुलाङ्गलधराः सप्तोत्तराः विंशति-

स्त्रैकाल्ये प्रथितास्त्रिषष्टिपुरुषा कुर्वन्तु ते मङ्गलम् ॥३॥

देव्यष्टौच जयादिका द्विगुणिता विद्यादिका देवताः

श्रीतीर्थङ्करमातृकाश्च जनका यक्षाश्च यक्ष्यस्तथा ।

द्वात्रिंशत्त्रिदशाधिपास्तिथिसुरा दिक्कन्यकाश्चाष्टधा,

दिक्पाला दशचैत्यमी सुरगणाः कुर्वन्तु ते मङ्गलम् ॥४॥

ये सर्वौषधिऋद्धयः सुतपसो वृद्धिङ्गताः पञ्च ये
ये चाष्टांङ्गमहानिमित्तकुशला येष्टाविधाश्चारणाः ।
पञ्चज्ञानधरास्त्रयोपि बलिनो ये वुद्धिऋद्धीश्वराः
सप्तैते सकलार्चिता गणभृतः कुर्वन्तु ते मङ्गलम् ॥५॥
कैलासो वृषभस्य निर्वृतिमही वीरस्य पावापुरी
चम्पा वा वसुपूज्यसज्जिनपते सम्मेदशैलोऽर्हताम् ।
निर्वाणावनयः प्रसिद्धविभवाः कुर्वन्तु ते मङ्गलम् ॥६॥
ज्योतिर्व्यन्तरभावनामरगृहे मेरौ कुलाद्रौ तथा
जम्बूशाल्मलिचैत्यशाखिषु तथा वक्षाररूप्याद्रिषु ।
इष्वाकारगिरौ च कुंडलनगे द्वीपेच नन्दीश्वरे
शैले ये मनुजोत्तरे जिनगृहाः कुर्वन्तु ते मङ्गलम् ॥७॥
यो गर्भावतरोत्सवो भगवतां जन्माभिषेकोत्सवो
यो जातः परिनिष्क्रमेण विभवो यः केवलज्ञानभाक् ।
यः कैवल्यपुरप्रवेशमहिमा संभावितः स्वर्गिभिः
कल्याणानि च तानि पञ्च सततं कुर्वन्तु ते मङ्गलम् ॥८॥

सर्पो हारलता भवत्यसिलता सत्पुष्पदामायते,
सम्पद्येत रसायनं विषमपि प्रीतिं विधत्ते रिपुः ।
देवा यान्ति वशं प्रसन्नमनसः किंवा बहु ब्रूमहे,

धर्मादेव नभोऽपि वर्षति नगैः कुर्वन्तु ते मङ्गलम् ॥६॥

आकाशं मूर्त्यभावादघकुलदहनादग्निरुर्वीक्षमान्त्या

नैः संगाद्वायुरापः-प्रशमगुणतया, स्वात्मनिष्ठैःसुयज्वा ।

सोमः सोमत्वयोगाद्रविरिति च विदुस्तेजसः सन्निधानात्

विश्वात्मा विश्वचक्षुर्वितरतु भवतां मङ्गलं श्रीजिनेन्द्रः॥ १०॥

इत्थं श्रीजिनमङ्गलाष्टकमिदं सौभाग्यसम्पत्करम्

कल्याणेषु महोत्सवेषु सुधियस्तीर्थङ्कराणां मुखाः ।

ये शृण्वन्ति पठन्ति तैश्च सुजनैः धर्मार्थकामान्विताः

लक्ष्मीराश्रयते व्यपायरहिता निर्वाणलक्ष्मीरपि ॥६॥

लघु अभिषेक पाठः

श्रीमज्जिनेन्द्रमभिवन्द्य जगत्त्रयेशं

स्याद्वादनायकमनन्तचतुष्टयार्हम् ।

श्रीमूलसंघसुदृशां सुकृतैकहेतु-

र्जैनेन्द्रयज्ञविधिरेष मयाभ्यधायि ॥१॥

श्रीमन्मन्दिरसुन्दरे शुचिजलैर्धौतैः सदर्भाक्षतैः

पीठे मुक्तिकरं निधाय रचितं त्वत्पादपद्मस्रजः ।

इन्द्रोऽहं निजभूषणार्थकमिदं यज्ञोपवीतं दधे

मुद्राकङ्कणशेखरान्यपि तथा जैनाभिषेकोत्सवे ॥२॥

(श्रीमज्जिनाभिषेचनसमये यज्ञोपवीतं धारयामि)

सौगन्ध्यसङ्गतमधुव्रतझङ्कृतेन
संवर्ण्यमानमिव गन्धमनिन्द्यमादौ ।
आरोपयामि विबुधेश्वरवृन्दवन्द्य-
पदारविन्दमभिवन्द्य जिनोत्तमानाम् ॥३॥

(श्रीमज्जिनाभिषेचनसमये स्वकीयाङ्गे तिलकवृन्दं धारयामि)

ये सन्ति केचिदिह दिव्यकुलप्रसूता
नागाःप्रभूतबलदर्पयुताः विबोधाः ।
संरक्षणार्थममृतेन शुभेन तेषां
प्रक्षालयामि पुरतःस्नपनस्य भूमिम् ॥४॥

(श्रीमज्जिनाभिषेचनाय भूमिशुद्धिं करोमि)

क्षीरार्णवस्य पयसां शुचिभिः प्रवाहै
प्रक्षालितं सुरवरैर्यदनेकवारम्
अत्युद्धमुद्यतमहं जिनपादपीठम्
प्रक्षालयामि भवसंभवतापहारि ॥५॥

(श्रीजिनेन्द्रपादपीठं स्नापयामि)

श्रीशारदासुमुखनिर्गतबीजवर्णम्
श्रीमङ्गलीकवरसर्वजनस्य नित्यम् ।

श्रीमत्स्वयं क्षयति तस्य विनाशविघ्नम्
श्रीकारवर्णलिखितं जिनभद्रपीठे ॥६॥

(श्रीजिनेन्द्रपादपीठे श्रीरित्यक्षरं लिखामि)

इन्द्राग्निदण्डधरनैऋतपाशपाणि
वायूत्तरेशशशिमौलिफणीन्द्रचन्द्राः
आगत्य यूयमिह सानुचराः सचिह्नाः
स्वं स्वं प्रतीच्छत बलिं जिनपाभिषके ॥७॥

(ॐ आँ क्रों ह्रीं श्रीजिनाभिषेचनक्रियायां सर्वविघ्न-विनाशाय सर्वशान्त्यर्थञ्च इन्द्राग्नियमनैऋतवरुण पवनकुवेरैशानधरणीन्द्रसोमेभ्यो दिक्पालेभ्यो बलि प्रयच्छामीति स्वाहा)

दध्युज्ज्वलाक्षतमनोहरपुष्पदीपैः
पात्रार्पितं प्रतिदिनंमहतादरेण ।
त्रैलोक्यमङ्गलसुखानलकामदाह
मारार्तिकं तव विभोरवतारयामि ॥८॥

(ॐ दध्यक्षतपुष्पप्रदीपैजिनेन्द्रस्यारातिंकमवतारयामि)

यः पाण्डुकामलशिलागतमादिदेव
मस्नापयन्सुरवराःसुरशैलमूर्ध्नि

कल्याणभीप्सुरहमक्षततोयपुष्पैः
संभावयामि पुरएव तदीयबिम्बम् ॥९॥
(ॐ ह्रीं श्रीमज्जिनेन्द्रबिम्बं जलाक्षतपुष्पाञ्जलिक्षेपणा-
नन्तरं श्रीतिममन्विते पादपीठे स्थापयामि)
सत्पल्लवार्चितमुखान्कलधौतरूप्यान्
ताम्रारकूटघटितान्पयसा सुपूर्णान् ।
सम्बाह्यतामिवगतांश्चतुरःसमुद्रान्
संस्थापयामि कलशान् जिनवेदिकान्ते ॥१०॥
(ॐ अथ सत्पत्रपिहितान् जलसंभृतान् काञ्चन-
कलशान् पादपीठस्य चतुःकोणेषु संस्थापयामि श्रीमद-
ज्जिनेन्द्राभिषेचनाय)
आभिः पुण्याभिरद्भिः परिमलबहुलेनामुना चन्दनेन,
श्रीदृक्पेयैरमीभिः शुचिसदलचयैरुद्गमैरेभि रुद्धैः ।
हृद्यैरेभिर्निवेद्यैर्मखभवनमिमैर्दीपयद्भिः प्रदीपैः
धूपैः प्रायोभिरेभिः पृथुभिरपि फलैरेभिरीशं यजामि ॥११॥
(ॐ ह्रीं श्री परमदेवाय श्रीअर्हत्परमेष्ठिने
ऽर्घंनिर्वपामीतिस्वाहा)
दूरावनम्रसुरनाथनाथकिरीटकोटि

संलग्नरत्नकिरणच्छविधूसरांघ्रिम् ।
प्रस्वेदतापमलमुक्तमपि प्रकृष्टै
र्भक्त्या जलैर्जिनपतिं बहुधाभिषिञ्चे ॥१२॥

ॐ ह्रीं श्रीमतं भगवन्तं कृपालसंतं वृषभादिमहावीर-चतुर्विंशतितीर्थङ्करपरमदेवान् आद्यानामाद्ये जम्बूद्वीपे भरतक्षेत्रे आर्यखण्डे........नाम्नि नगरे मासानामुत्तमे मासे.....पक्षे........शुभदिने मुन्यार्यिकाश्रावक-श्राविकाचतुर्विधसंघान् सकलकर्मक्षयार्थं जलेनाभिषिञ्चे नमः ॥

(जलधाराक्षेपणमर्घसम्प्रदानञ्च)

उत्कृष्टवर्णनवहेमरसाभिराम-
देहप्रभावलयसंगमलुप्तदीप्तिम्
धारां घृतस्य शुभगन्धगुणानुमेयां
वन्देऽर्हतां सुरभिसंस्नपनोपयुक्ताम् ॥१३॥

ॐ ह्रीं श्रीमतं भगवन्तं..........सकलकर्मक्षयार्थं घृतेनाभिषिंचे नमः ॥

(घृतधाराक्षेपणमर्घसम्प्रदानञ्च)

सम्पूर्णशारदशशाङ्कमरीचिजाल

स्यन्दैरिवात्मयशसामिव सुप्रवाहैः ।
क्षीरैर्जिनाः शुचिवरैरभिषिच्यमानाः
सम्पादयन्तु मम चित्तसमीहितानि ॥१४॥

ॐ ह्रीं श्रीमतं भगवन्तं............सकल कर्मक्षयार्थं क्षीरेणाभिषिञ्चे नमः ।

(क्षीरधाराक्षेपणमर्घसम्प्रदानञ्च)

दुग्धाब्धिवीचिपयसाचितफेनराशि-
पाण्डुत्वकान्तिमवधीरयतामतीव ।
दध्नां गतां जिनपते प्रतिमां सुधारा
सम्पद्यतां सपदि वांछितसिद्धये नः ॥१५॥

ॐ ह्रीं श्रीमतं भगवन्तं कृपालसन्तं............सकल-कर्मक्षयार्थं दध्नाभिषिञ्चे नमः ॥

(दधिधाराक्षेपणमर्घसम्प्रदानञ्च)

भक्त्या ललाटतटदेशनिवेशितोच्चैः
हस्तैश्च्युताः सुरवराऽसुरमर्त्यनाथैः ।
तत्कालपीलितमहेक्षुरसस्यधारा
सद्यः पुनातु जिनबिम्बगतैव युष्मान् ॥१६॥

ॐ ह्रीं श्रीमतं भगवन्तं कृपालसन्तं.........सकलकर्म-क्षयार्थं मिक्षुरसेनाभिषिञ्चे नमः ॥

(इक्षुधाराक्षेपणमर्घसम्प्रदानञ्च)

संस्नापितस्य घृतदुग्धदधीक्षुवाहैः
सर्वाभिरौषधिभिरर्हतमुज्ज्वलाभिः ।
उद्वर्तितस्य विदधाम्याभिषेकमेला-
कालेयकुंकुमरसोत्कटवारिपूरैः ॥१७॥

ॐ ह्रीं श्रीमतं भगवन्तं कृपालसन्तं·········सकल कर्म-
क्षयार्थं सर्वौषधिरसेनाभिषिञ्चे नमः ॥

(सर्वौषधिरसक्षेपणमर्घसम्प्रदानञ्च)

द्रव्यैरनल्पघनसारचतुःसमाद्यै
सामोदवासितसमस्तदिगन्तरालैः ।
मिश्रीकृतेन पयसा जिनपुङ्गवानां
त्रैलोक्यपावनमहं स्नपनं करोमि ॥१८॥

ॐ ह्रीं श्रीमतं भगवन्तं कृपालसन्तं···········सकल
कर्मक्षयार्थं सुगन्धिजलेनाभिषिञ्चे नमः ॥

(सुगन्धिजलक्षेपणमर्घसम्प्रदानञ्च)

मुक्तिश्रीवनिताकरोदकमिदं पुण्याङ्कुरोत्पादकम्,
नागेन्द्रत्रिदशेन्द्रचक्रपदवीराज्याभिषेकोदकम् ।
सम्यग्ज्ञानचरित्रदर्शनलतासम्वृद्धिसम्पादकम्
कीर्तिश्रीजयसाधकं तव जिनस्नानस्य गन्धोदकम् ॥१९॥

अथच—

निर्मलं निर्मलीकरणंपवित्रं पापनाशकम् ।
जिनगन्धोदकं वन्दे कर्माष्टकविनाशकम् ॥२०॥

(निजाङ्गे गन्धोदकचर्चनम्)

शान्ति मन्त्र

ॐ नमः सिद्धेभ्यः । श्रीवीतरागाय नमः

ॐ नमोऽर्हते भगवते श्रीमते श्रीपार्श्वतीर्थंकराय द्वादशगणपरिवेष्टिताय शुक्लध्यानपवित्राय सर्वज्ञाय स्वयंम्भुवे सिद्धाय बुद्धाय परमात्मने परमसुखाय त्रैलोक्य-महीव्याप्ताय अनन्तसंसारचक्रपरिमर्दनाय अनन्त-दर्शनाय अनन्तवीर्याय अनन्तसुखाय त्रैलोक्यवशङ्कराय सत्यज्ञानाय सत्यब्रह्मणे धरणेन्द्रफणामण्डलमण्डिताय ऋष्यार्यिकाश्रावकश्राविकाप्रमुखचतुःसंघोपसर्गविनाशाय घातिकर्मविनाशाय अघातिकर्मविनाशाय अपवादम-स्माकं छिंद छिंद भिन्द-भिन्द, मृत्युं छिन्द-छिन्द भिन्द-भिन्द अतिकामं छिन्द-छिन्द भिन्द-भिन्द, रतिकामं छिन्द-छिन्द भिन्द-भिन्द, क्रोधं छिन्द-छिन्द भिन्द-भिन्द, अग्निं छिन्द-छिन्द भिन्द-भिन्द, सर्वशत्रुं छिन्द-छिन्द भिन्द-

भिन्द, सर्वोपसर्गं छिन्द-छिन्द भिन्द-भिन्द, सर्वराजभयं छिन्द-छिन्द भिन्द-भिन्द, सर्वचोरभयं छिन्द-छिन्द भिन्द-भिन्द, सर्वदुष्टभयं छिन्द-छिन्द भिन्द-भिन्द, सर्वमृगभयं छिन्द-छिन्द भिन्द-भिन्द, सर्वपरमन्त्रं छिन्द-छिन्द भिन्द-भिन्द, सर्वमात्मकं भयं छिन्द-छिन्द भिन्द-भिन्द, सर्वशूलभयं छिन्द-छिन्द भिन्द-भिन्द, सर्वक्षयरोगं छिन्द-छिन्द भिन्द-भिन्द, सर्वकुष्टरोगं छिन्द-छिन्द भिन्द-भिन्द, सर्वज्वरमारीं छिन्द-छिन्द भिन्द-भिन्द, सर्वगजमारीं छिन्द-छिन्द भिन्द-भिन्द, सर्वाश्वमारीं छिन्द-छिन्द भिन्द-भिन्द, सर्वगोमारीं छिन्द-छिन्द भिन्द-भिन्द, सर्वमहिषमारीं छिन्द-छिन्द भिन्द-भिन्द, सर्वधान्यमारीं छिन्द-छिन्द भिन्द-भिन्द, सर्ववृक्षमारीं छिन्द-छिन्द भिन्द-भिन्द, सर्वगुल्ममारीं छिन्द-छिन्द भिन्द-भिन्द, सर्वपत्रमारीं छिन्द-छिन्द, भिन्द-भिन्द, सर्वपुष्पमारीं छिन्द-छिन्द भिन्द-भिन्द, सर्वराष्ट्रमारीं छिन्द-छिन्द भिन्द-भिन्द, सर्वदेशमारीं छिन्द-छिन्द, भिन्द-भिन्द, सर्वविषमारीं छिन्द-छिन्द भिन्द-भिन्द, सर्वक्रूररोगं छिन्द-छिन्द भिन्द-भिन्द, सर्ववैतालशाकिनीभयं छिन्द-छिन्द भिन्द-भिन्द, सर्ववेदनीयं छिन्द-छिन्द भिन्द-

भिन्द-भिन्द, सर्वमोहनीयं छिन्द-छिन्द भिन्द-भिन्द, ॐ सुदर्शनमहाराजचक्रविक्रमतेजोबलशौर्यशान्तिं कुरु कुरु, सर्वजनानन्दनं कुरु कुरु, सर्वभव्यानन्दनं कुरु कुरु, सर्वगोकुलानन्दनं कुरु कुरु, सर्वग्रामनगरखेटकर्वटमटम्ब पत्तनद्रोणमुखसहानन्दनं कुरु कुरु, सर्वलोकानन्दनं कुरु-कुरु, सर्वदेशानन्दनं कुरु कुरु, सर्वयजमानानन्दनं कुरु-कुरु, हन हन, दह दह, पच पच, कुट कुट, शीघ्रं व्याधिव्यसनवर्जितमभयक्षेमारोग्यं, स्वस्तिरस्तु, शान्ति-रस्तु, शिवरस्तु, कुलगोत्रधनधान्यं सदास्तु । चन्द्रप्रभ पुष्पदन्त - शीतल - मुनिसुव्रत - नेमिनाथ - वासुपूज्य - मल्लि-वर्द्धमान-पार्श्वनाथपरमदेवाः सदा शान्तिं कुर्वन्तु कुर्वन्तु इति स्वाहा ॥

(पुष्पाञ्जलिं क्षिपामि)

स्थापना

ॐ जय । जय । जय ।

नमोस्तु । नमोस्तु । नमोस्तु ।

णमो अरहंताणं णमो सिद्धाणं णमो आइरीयाणं ।
णमो उवज्झायाणं णमो लोए सव्वसाहूणं ॥

ॐ अनादिमूलमंत्रेभ्यो नमः (पुष्पाञ्जलिं क्षिपामि)

चत्तारि मंगलं - अरहन्ता मंगलं, सिद्धा मंगलं साहू मंगलं,

केवलिपण्णत्तो धम्मो मंगलं।

चत्तारि लोगुत्तमा—अरहंता लोगुत्तमा, सिद्धा लोगुत्तमा, साहू लोगुत्तमा केवलिपण्णत्तो धम्मो लोगुत्तमा।

चत्तारि शरणं पव्वज्जामि—अरहंते शरणं पव्वज्जामि, सिद्धे शरणं पव्वज्जामि, साहू शरणं पव्वजामि, केवलिपण्णत्तं, धम्मं शरणं पव्वज्जामि।

ॐ नमोऽर्हते भगवते स्वाहा (पुष्पाञ्जलिं क्षिपामि)

अपवित्रः पवित्रो वा। सुस्थितो दुस्थितोऽपि वा।
ध्यायेत्पञ्चनमस्कारं सर्वपापैः प्रमुच्यते ॥१॥
अपवित्रः पवित्रो वा सर्वावस्थां गतोऽपि वा।
यः स्मरेत्परमात्मानं स वाह्याभ्यन्तरे शुचिः ॥२॥
अपराजितमन्त्रोऽयं सर्वविघ्नविनाशनः।
मङ्गलेषु च सर्वेषु प्रथमं मङ्गलं मतः ॥३॥
एसो पञ्चणमोयारो सव्वपावप्पणासणो।
मंगलाणं च सव्वेसिं पढमं होइ मंगलम् ॥४॥
अर्हमित्यक्षरब्रह्मवाचकं परमेष्ठिनः।
सिद्धचक्रस्य सद्बीजं सर्वतः प्रणमाम्यहम् ॥५॥
कर्माष्टकविनिर्मुक्तं मोक्षलक्ष्मीनिकेतनम्।
सम्यक्त्वादिगुणोपेतं सिद्धचक्रं नमाम्यहम् ॥६॥

विघ्नौघा: प्रलयं यान्ति शाकिनीभूतपन्नगाः ।
विषं निर्विषतां याति स्तूयमाने जिनेश्वरे ॥७॥

(यदि समय हो तो पर्वके दिनोंमें सहस्रनामपूजा या सहस्रनाम-स्तवन पाठ पढ़कर दश अर्घ चढाना चाहिए अन्यथा नीचेका पद्य पढ़कर अर्घ चढ़ावे)

उदकचन्दनतन्दुलपुष्पकैश्चरुसुदीपसुधूपफलार्घकैः ।
धवलमङ्गलगानरवाकुले जिनगृहे जिननाथमहंयजे ॥

ॐ ह्रीं श्री भगवज्जिनसहस्रनामेभ्यो अर्घ्यं निर्वपामीति स्वाहा ।

श्रीमज्जिनेन्द्रमभिवन्द्य जगत्त्रयेशं स्याद्वादनायकमनंतचतुष्टयार्हम् । श्रीमूलसंघसुदृशां सुकृतैकहेतुर्जैनेन्द्रयज्ञविधिरेष मयाऽभ्यधायि ।

स्वस्ति त्रिलोकगुरवे जिनपुङ्गवाय,
स्वस्ति स्वभावमहिमोदयसुस्थिताय ।
स्वस्ति प्रकाशसहजोर्जितदृङ्मयाय,
स्वस्ति प्रसन्नललिताद्भुतवैभवाय ॥८॥
स्वस्त्युच्छलद्विमलबोधसुधाप्लवाय,
स्वस्ति स्वभावपरभावविभासकाय ।
स्वस्ति त्रिलोकविततैकचिदुद्गमाय,

स्वस्ति त्रिकालसकलायतविस्तृताय १०॥

द्रव्यस्य शुद्धिमधिगम्य यथानुरूपम्,

भावस्य शुद्धिमधिकामधिगन्तुकामः ।

आलम्बनानि विविधान्यवलंब्यवल्गन्,

भूतार्थयज्ञपुरुषस्य करोमि यज्ञम् ॥११॥

अर्हत्पुराणपुरुषोत्तमपावनानि,

वस्तून्यनूनमखिलान्ययमेकएव ।

अस्मिन् ज्वलद्विमलकेवलबोधवह्नौ,

पुण्यं समग्रमहमेकमना जुहोमि ॥१२॥

(ॐ ह्रीं विधियज्ञप्रतिज्ञानाय जिनप्रतिमाग्रे पुष्पाञ्जलिं क्षिपामि)

चिद्रूपंविश्वरूपव्यतिकरितमनाद्यन्तमानन्दसान्द्रम् ,

यत्प्राक्तै स्तैर्विवर्तैर्व्यतदतिपतद्दुःखसौख्याभिमानैः ।

कर्मोद्रेकात्तदात्मप्रतिघमलभिदोद्भिन्ननिःसीमतेजः,

प्रत्यासीदत्परोजः स्फुरदिह परमब्रह्मयज्ञे ऽर्हमाह्वम्॥१३॥

ॐ परमब्रह्मयज्ञप्रतिज्ञानाय प्रतिमोपरि पुष्पाञ्जलिं क्षिपामि

देव-पूजनम्

—स्थापना —

स्वामिन् संवौषट् कृतावाहनस्य

द्विष्ठान्तेनोट्टंकितस्थापनस्य ।

स्वं निर्नेक्तुं ते वषट्कार जाग्रत्
सांनिध्यस्य प्रारभेयाष्टधेष्टिम् ॥१॥

ॐ ह्रीं अर्ह श्री परब्रह्म अत्रावतरावतर संवौषट् ।
ॐ ह्रीं अर्हं श्री परब्रह्म अत्र तिष्ठ तिष्ठ ठ ठः ।
ॐ ह्रीं अर्हं श्री परब्रह्म अत्र मम सन्निहितं भव भव वषट्

व्योमापगाद्युत्तमतीर्थवार्गं धारावरांभोजपरागसारा ।
तीर्थङ्करानामियमंघ्रिपीठे स्वैरं लुठित्वा त्रिजगत्पुनातु ॥२॥

मलिन वस्तु उज्ज्वल करै यह स्वभाव जलमाहि ।
तासों जिनपद पूजिये कृत-कलङ्क मिट जाँहि ॥
नीर बुझावे अग्निको तृषारोग नहि जाय ।
तृषारोग प्रभु तुम हरो याते पूजूं पाँय ॥

ॐ ह्रीं अर्हं श्री ब्रह्मणेऽनन्तानन्तज्ञानशक्तये, अष्टादश-दोष रहिताय, षट्चत्वारिंशद्गुणसहिताय अर्हत्परमेष्ठिने जन्म-जरा-मृत्युविनाशनाय जलं निर्वपामीति स्वाहा ।

काश्मीरकृष्णागुरुगन्धसारकर्पूरपौरस्त्यविलेपनेन ।
निसर्गसौरभ्यगुणोल्वणानां संचर्चयाम्यंघ्रियुगं जिनानाम् ॥

तपत वस्तु शीतल करै चन्दन शीतल आप ।
चन्दनसे पूजा करूं मिटै मोह सन्ताप ॥
चन्दन शीतलता करै भवाताप नहि जाय ।

भवाताप प्रभु तुम हरो याते पूजूं पाय ॥

ॐ ह्रीं अर्हं श्रीपरब्रह्मणे ..... संसारातापविनाशनाय चन्दनं निर्वपामीति स्वाहा ।

आमोदमाधुर्यनिधानकुन्दसौन्दर्यशुम्भत्कलमक्षतानाम् ।
पुञ्जैः समक्षैरिव पुण्यपुंजैर्विभूषयाम्यग्रभुवं विभूनाम् ॥४॥

तन्दुल धवल पवित्र अति नाम सुअक्षत तास ।
अक्षत सों जिन पूजये अक्षयगुणपरकास ॥
अक्षय-अक्षय मैं कहूं मो अक्षयपद भाय ।
अक्षय पद प्रभु तुम लियो याते पूजूं पाय ॥

ॐ ह्रीं अर्हं श्रीपरब्रह्मणे .... अक्षयपदप्राप्तये अक्षतं निर्वपामीति स्वाहा ।

सुजातजातीकुमुदाब्जकुन्दमन्दारमल्लीवकुलादिपुष्पैः ।
मत्तालिमालामुखैरर्जिनेन्द्रपादारविन्दद्वयमर्चयामि ॥५॥

पुष्प-चाप धर पुष्प-सर धारी मनमथ वीर ।
यातें पूजा पुष्पकी हरै मदनकी पीर ॥
काम-बाण पुष्पै हरो सो तुम जीते राय ।
यातें मैं पायन पडूं मदन-काम नशि जाय ॥

ॐ ह्रीं अर्हं श्रीपरब्रह्मणे ..... कामरोगविध्वंसनाय पुष्पं निर्वपामीति स्वाहा ।

नानारसव्यञ्जनदुग्धसर्पिपक्वान्नशाल्यन्नदधीक्षुभक्ष्यम् ।
यथार्थहेमादिसुभाजनस्थं जिनक्रमाग्रे चरुमर्पयामि ॥५॥

परम अन्न नैवेद्य-विधि क्षुधा-हरण तन-पोष ।
जो पूजूं नैवेद्यसों मिटे क्षुधादिक-रोग ॥
भोजन नानाविधि किए मूल क्षुधा नहि जाय ।
क्षुधा-रोग प्रभु तुम हरो यातें पूजूं पाय ॥

ॐ ह्रा अर्हं श्रीपरब्रह्मणे ······ क्षुधारोगविनाशनाय नैवेद्यं निर्वपामीति स्वाहा ।

ॐ लोकानामर्हतां भूर्भुवःस्वर्लोकानेकीकुर्वतां ज्ञानधाम्ना ।
दीपव्रातैर्प्रज्वलत्कीलजालैः पादांभोजद्वंद्वमुद्योतयामि ॥६॥

आप-परदेखे सकल, निशिमें दीपक-जोत ।
दीपकसों जिन पूजिये निर्मल ज्ञान-उद्योत ॥
दीप-घटा घटमें वसै ज्ञान-घटा घरमाहिं ।
ढूढत डोले कर्मको कृत-कलंक मिट जाहि ॥

ॐ ह्रीं अर्हं श्रीपरब्रह्मणे ········ मोहान्धकारविनाशाय दीपं निर्वपामीति स्वाहा ।

श्रीखण्डादिद्रव्यसंदर्भगर्भैरुद्यद्भूम्यामोदितास्वर्गिवर्गैः ।
धूमैः पापव्यापदुच्छेददक्षानंघ्रीनर्हत्स्वामिनां धूपयामि ॥८॥

पावक दहै सुगन्धको, धूप चढावै सोय ।

खेवत धूप जिनेशको अष्ट-कर्म-क्षय होय ॥

जब धूपायनमें लगे ध्यान-अग्नि-करवीर ।

कर्म-काठिया खेव हूं त्रिभुवन-पति गम्भीर ॥

ॐ ह्रीं अर्हं श्रीपरमब्रह्मणे ... अष्टकर्मदहनाय धूपं निर्वपामीति स्वाहा

फलोत्तमैर्दाडिममातुलिंगनारिंगपुंगाम्रकपित्थपूर्वैः ।

हृद्घ्राणनेत्रोत्सवमुद्गिरद्भिः फलैर्भजेर्हत्पदपद्मयुग्मम् ॥८॥

जो जैसी करनी करै सो तैसा फल लेय ।

फल-पूजा महाराजकी निश्चय शिव-फल देय ॥

फलियन-फलियन मैं कहूं सो फलियन फल नाहिं ।

महा मोक्ष-फल तुम लियो यातें पूजूं पाहिं ॥

ॐ ह्रीं अर्हं श्री परब्रह्मणे ... ... मोक्षफलप्राप्तये फलं निर्वपामीति स्वाहा ।

वार्गंधादिद्रव्यसिद्धार्थदूर्वा

नंद्यावर्तस्वास्तिकाद्यैरनिद्यैः ।

हैमेपात्रे प्रस्तृतं विश्वनाथात्-

प्रत्यानन्दादर्घमुत्तारयामि ॥९॥

जलधारा चन्दन-घसी अक्षत-पुष्प-नैवेद्य ।

दीप-धूप-फल-अर्ध युत ये पूजा [illegible]

ये जिनपूजा अष्टविधि कीजे कर शुचि अंग ।

प्रति-पूजा जल-धार सु दीजे धार अभंग ॥

ॐ ह्रीं अर्हं श्रीपरब्रह्मणे..........अनर्घ्यपदप्राप्ताय अर्घं निर्वपामीति स्वाहा ।

वृषभो वृषलक्ष्मीवानजितो जितदुष्कृतः ।

संभवः संभवत्कीर्तिः साभिनंदोऽभिनंदनः ॥

सुमतिः सुमतिः पद्मप्रभः पद्मप्रभः प्रभुः ।

सुपार्श्वः पार्श्वरोचिष्णुश्चन्द्रश्चन्द्रप्रभः सताम् ॥

पुष्पदंतोस्तपुष्पेषुः शीतलः शीतलोदितः ।

श्रेयान् श्रेयस्विनां श्रेयान् सुपूज्यः पूज्यपूजितः ॥

विमलो विमलोऽनन्तज्ञानशक्तिरनन्तजित् ।

धर्मो धर्मोदयादित्यः शान्तिः शान्तिक्रियाग्रणीः ॥

कुंथुः कुंथ्वादिसदयः सुरप्रीतिररप्रभुः ।

मल्लिर्मल्लिजये मल्लः सुव्रतो मुनिसुव्रतः ॥

नमिर्नमितसुरासारो नेमिर्नेमिस्तपोरथे

पार्श्वः पार्श्वस्फुरद्रोचिः सन्मतिः सन्मतिप्रियः ॥

एते तीर्थकृतोनंतैर्भूतसद्भाविभिः समम् ।

पुष्पाञ्जलिप्रदानेन सत्कृताः सन्तु शांतये ॥

(ॐ ह्रीं अर्हं श्रीचतुर्विंशतीर्थंकरेभ्योः पुष्पाञ्जलिं क्षिपामि).

शास्त्र-पूजनम्

—स्थापना—

प्रकटितपरमार्थे शुद्धसिद्धान्तसारे
जिनपतिसमयेऽस्मिन् शारदासंदधानः ।
जगति समयसारः कीर्तितोऽसौ मुनीन्द्रैः
स विशतु मम चित्ते, सत्श्रुतज्ञानरूपः ॥

ॐ ह्रीं श्रीजिनमुखोद्भूतनयगर्भितद्वादशाङ्गश्रुतज्ञान ! अत्रावतरावतर । अत्र तिष्ठ तिष्ठ ठः ठः । अत्र मम सन्निहितं भव भव वषट् ।

अतुलसौख्यनिधानमनायकं शिवप्रदं विपदन्तकरं परम् ।
जगहितं जिननाथमुखोद्गतं समयसारमहं सलिलैर्यजे ॥

ॐ ह्रीं जिनमुखोद्भूतनयगर्भितद्वादशाङ्गश्रुतज्ञानाय जलं निर्वपामीति स्वाहा ।

विषयभोगविवर्धितसुस्थितः त्रिभुवनं प्रतिबोधमयो नया-
दुदयमत्रगतो वरचन्दनैः समयसारसहस्रकरोऽर्च्यते ॥

ॐ ह्रीं जिनमुखोद्भूत...... .. चन्दनं निर्वपामीति स्वाहा ।

भवविषोषितचेतनसत्सुखं मदनदुष्टज्वरशमनौषधिम् ।
शुभनिधिं प्रतिबोधितसत्सुखं समयसारमिहाक्षतकैर्यजे ॥

ॐ ह्रीं जिनमुखोद्भूत.........अक्षतान् निर्वपामीति स्वाहा ।

शुभपदार्थमणिद्युतिभिः युतं प्रहतदुर्धरमोहतमोभरम् ।
समयसारनिधिं सुदरिद्रता-प्रशमनाय महामि सरोरुहैः ॥

ॐ ह्रीं जिनमुखोद्भूत······ पुष्पं निर्वपामीति स्वाहा ।

प्रसुनरामरनाथमुखोद्गतस्तुतिवचःकुसुमोत्करपूजितम् ।
समयसारमपाररसान्वितैश्चरूवरैप्र यजे शिवशर्मणे ॥

ॐ ह्रीं जिनमुखोद्भूत··· ····· नैवेद्यं निर्वपामीति स्वाहा ।

विमलकेवलबोधविधायिनीं समयसारमयीं किल देवताम् ।
हततमप्रसरैर्मणिदीपकैर्भगवतीं महतीं परिपूजये ॥

ॐ ह्रीं जिनमुखोद्भूत · · दीपं निर्वपामीति स्वाहा ।

दृग्विबोधसुवृत्तमहौषधिशमितजन्मजरामरणामयम् ।
अगरुणां गुरुधूपभरादहं समयसारमसारहरं यजे ॥

ॐ ह्रीं जिनमुखोद्भूत · धूपं निर्वपामीति स्वाहा ।

समयसारमयीं त्रिदशापगां परमहंसकुलोद्भवसूचिकाम् ।
त्रिभुवने, कलुषक्षयकारिणीं शुभफलैः पुनतीं परिपूजये ॥

ॐ ह्रीं जिनमुखोद्भूत ·· · फलं निर्वपामीति स्वाहा ।

विषमजाड्यपविनाशपटीयसीं स्फुटतरां प्रतिभैकविवर्धिनीम् ।
समयसारमयीं श्रुतदेवतां मृदुदुकूलपटेन समर्चये ॥

ॐ ह्रीं जिनमुखोद्भूत ····शास्त्रस्वरूपाय वस्त्रं निर्वपामीति स्वाहा ।

[सरोरुहैः शुभाक्षतैः सरसचन्दननिर्मलैः, कनत्कनकभाजनस्थितैर्दीपैस्तथा धूपैर्यजे । अभीष्टफल-लब्धये फलैर्मुदा परमपदप्राप्तये सरस्वतीमहमर्घैर्यजे १]

जलैः सुगंधैर्विमलाक्षतैश्च नैवेद्यदीपागरुधूम्रकैर्वा ।
नेत्रोत्सवैः स्वादुफलैः समर्घैः सञ्चर्चयामि श्रुतदेवतायै ॥

ॐ ह्रीं जिनमुखोद्भूत ······ अर्घं निर्वपामीति स्वाहा ।

त्रिजगदीशजिनेन्द्रमुखोद्भवा, त्रिजगतीजनजातिहितङ्करा ।
त्रिभुवने सुनुताहि सरस्वती, चिदुपलब्धिमियं वितनोतु मे ॥
अखिलनाकशिवाध्वनदीपिका, नवनयेषु विरोधविनाशिनी ।
मुनिमनाम्बुजमोदनभानुभा, चिदुपलब्धिमियं वितनोतु मे ॥
यतिजनाचरणादिनिरूपिणी, द्विदशभेदगतागतिदूषिणी ।
भवभवातपनाशनचन्द्रिका, चिदुपलब्धिमियं वितनोतु मे ॥
गुणसमुद्रविशुद्ध्यपरात्मनि, प्रकटनैककथासुपटीयसी ।
जितसुधा निजभक्तशिवप्रदा, चिदुपलब्धिमियं वितनोतु मे ॥
विविधदुःखजले भवसागरे, गदजरादिकनक्रझषाकुले ।
असुभृतां किल तारण-नौ-समा, चिदुपलब्धिमियं वितनोतु मे ॥
गगनपुद्गलधर्मअधर्मकैः सहसदा सगुणैश्चिदनेहसी ।
नवपदार्थविनश्वयिनी सदा, चिदुपलब्धिमियं वितनोतु मे ॥
गुरुरयं हितवाक्यमिदं गुरु, शुभमिदं जगतामथवाऽशुभम् ।

यतिजनो हि यतोत्रऽवलोक्यते, चिदुपलब्धिमियं वितनोतु मे
त्यजत दुर्मतिमेव शुभे मतिं, प्रतिदिनं कुरुते च गुरौ रतिम्।
जड़नरेऽपिदयार्पितधीधना, चिदुपलब्धिमियं वितनोतु मे ॥
खलु नरस्य मनो रमणीजने, न रमते रमते परमात्मनि।
यदनुभक्तिभरस्य नरस्य वै, चिदुपलब्धिमियं वितनोतु मे ॥
विविधकाव्यकृते मतिसंभवे, भवति चार्थतदर्थविचारणे।
यदनुभक्तिभरान्वितमानवे, चिदुपलमियं वितनोतु मे ॥१०॥

योऽहर्निशं पठति मानसमुक्तिसारम्।
स्यादेव तस्य भवनीरसमूहपारम्।
मुक्तं जिनेन्द्रवचसो हृदयं जहार
श्रीज्ञानभूषणमुनिः स्तवनं चकार ॥

(पुष्पाञ्जलिं क्षिपामि)

गुरु-पूजनम्

सिद्धान्त-सूक्तिसंकीर्णे श्रुतस्कन्ध-घने वने।
आचार्यत्वं प्रपद्यस्य पादानभ्यर्चये मुनेः ॥

ॐ ह्रीं आचार्योपाध्यायसाधुसमूह अत्रावतरावतर। अत्र तिष्ठ तिष्ठ ठः ठः। अत्र मम सन्निहितो भव भव वषट्।

हेमभृङ्गारनिर्यांतहारया वारिधारया।
पूजयामि गुरुं भक्त्या गौतमं गणनायकम् ॥१॥

ॐ ह्रीं आचार्योपाध्यायसाधुसमूहाय जलं निर्वपामीति स्वाहा ।

श्री खण्डागुरुकर्पूरामिश्रया गन्धचर्चया ।

पूजयामि गुरुं भक्त्या गौतमं गणनायकम् ॥२॥

ॐ ह्रीं आचार्योपाध्यायसाधुसमूहाय चन्दनं निर्वपामीति स्वाहा ।

अक्षतैरक्षयानन्तसम्पत्सम्पादनक्षमैः ।

पूजयामि गुरुं भक्त्या गौतमं गणनायकम् ॥३॥

ॐ ह्रीं आचार्योपाध्याय साधुसमूहाय अक्षतं निर्वपामीति स्वाहा ।

पुष्पैश्चम्पकपुन्नागमल्लिकाबकुलादिनाम् ।

पूजयामि गुरुं भक्त्या गौतमं गणनायकम् ॥४॥

ॐ ह्रीं आचार्योपाध्यायसाधुसमूहाय पुष्पं निर्वपामीति स्वाहा ।

नैवेद्यनानवद्येन सुधासारसमञ्चषा ।

पूजयामि गुरुं भक्त्या गौतमं गणनायकम् ॥५॥

ॐ ह्रीं आचार्योपाध्यायसाधुसमूहाय नैवेद्यं निर्वपामीति स्वाहा ।

दीपैर्कर्पूरनिर्भ्रान्तवर्तिकाग्रविनिर्गतैः ।

पूजयामि गुरुं भक्त्या गौतमं गणनायकम् ॥६॥

ॐ ह्रीं आचार्योपाध्याय साधुसमूहाय दीपं निर्वपामीति स्वाहा ।

सौरभ्याकृष्ट सन्धूपै धूम्रै रगरुसंभवैः ।

पूजयामि गुरुं भक्त्या गौतमं गणनायकम् ॥७॥

ॐ ह्रीं आचार्योपाध्यायसाधुसमूहाय धूपं निर्वपामीति स्वाहा ।

फलैर्नारिङ्गजम्बीरजम्बाद्यहृद्यतां गतैः ।
पूजयामि गुरुं भक्त्या गौतमं गणनायकम् ॥

ॐ ह्रीं आचार्योपाध्यायसाधुसमूहाय फलं निर्वपामीति स्वाहा ।

यमनियमनिधीनामर्चयित्वा यतीना-
मपरमितगुणानामंघ्रिपद्मानि भक्त्या ।
तदनुसकलभव्यप्राणिकर्मोपशांत्यै,
सुचरमुपचरामि वारिभिः शान्तिधारा ॥

ॐ ह्रीं आचार्योपाध्यायसाधुसमूहाय अर्घं निर्वपामीति स्वाहा ।

गुरवः शान्ति वो नित्यं ज्ञानदर्शननायकाः ।
चारित्रार्णवगम्भीरा मोक्षमार्गोपदेशकाः ॥

ॐ ह्रीं आचार्योपाध्यायसाधुसमूहाय पुष्पाञ्जलिं क्षिपामि

स्वस्ति मङ्गलम्

श्रीवृषभो नः स्वस्ति, स्वस्ति श्रीअजितः ।
श्रीसंभवः स्वस्ति, स्वस्ति श्रीअभिनंदनः ।
श्रीसुमतिः स्वस्ति, स्वस्ति श्रीपद्मप्रभः ।
श्री सुपार्श्वः स्वस्ति, स्वस्ति श्रीचंद्रप्रभः ।
श्रीपुष्पदंतः स्वस्ति, स्वस्ति श्रीशीतलः ।
श्रीश्रेयांसः स्वस्ति, स्वस्ति श्रीवासुपूज्यः ।
श्रीविमलः स्वस्ति, स्वस्ति श्रीअनंतः ।

श्रीधर्मः स्वस्ति, स्वस्ति श्रीशान्तिः ।
श्रीकुंथुः स्वस्ति स्वस्ति श्रीअरनाथः ।
श्रीमल्लिः स्वस्ति स्वस्ति श्रीमुनिसुव्रतः ।
श्रीनमिः स्वस्ति स्वस्ति श्रीनेमिनाथः ।
श्रीपार्श्वः स्वस्ति स्वस्ति श्रीवर्द्धमानः ।

(पुष्पांजलि क्षेपण)

नित्याप्रकंपाद्भुतकेवलौघाः स्फुरन्मनःपर्ययशुद्धबोधाः।
दिव्यावधिज्ञानबलप्रबोधाः स्वस्ति क्रियासुः परमर्षयो नः ॥

(पुष्पाञ्जलिं क्षिपामि)

कोष्ठस्थधान्योपममेकबीजं संभिन्नसंश्रोतृपदानुसारि ।
चतुर्विधं बुद्धिबलं दधानाः स्वस्ति क्रियासुः परमर्षयो नः ॥
संस्पर्शनं संश्रवणं च दूरादास्वादनघ्राणविलोकनानि ।
दिव्यान्मतिज्ञानबलाद्वहंतः स्वस्ति क्रियासुः परमर्षयो नः ॥
प्रज्ञाप्रधानाः श्रमणाः समृद्धाः प्रत्येक बुद्धा दशसर्वपूर्वैः ।
प्रवादिनोऽष्टांगनिमित्तविज्ञा स्वस्ति क्रियासुः परमर्षयो नः ॥
जंघावलिश्रेणिफलांबुतंतुप्रसूनबीजांकुरचारणाह्वाः ।
नभोऽङ्गणस्वैरविहारिणश्च स्वस्ति क्रियासुः परमर्षयो नः ॥
अणिम्नि दक्षाः कुशला महिम्नि
लघिम्नि शक्ताः कृतिनो गरिम्णि ।

मनोवपुर्वाग्बलिनश्च नित्यं,

स्वस्ति क्रियासुः परमर्षयो नः ॥

सकामरूपित्ववशित्वमैश्यप्राकम्यमंतर्द्धिमथाप्तिमाप्ताः ।

तथाऽप्रतीघातगुणप्रधानाः । स्वस्ति क्रियासुः परमर्षयो नः ॥

दीप्तं च तप्तं च तथा महोग्रं घोरं तपो घोरपराक्रमस्थाः ।

ब्रह्मापरं घोरगुणाश्चरंतः स्वस्ति क्रियासुः परमर्षयो नः ॥

आमर्षसर्वौषधयस्तथाशीर्विषंविषादृष्टिर्शीविषंविषाश्च ।

सखिल्लविड्जल्लमलौषधीशाः स्वस्ति क्रियासुः परमर्षयो नः ॥

क्षीरं स्रवंतोऽत्र घृतं स्रवंतो मधुस्रवंतोऽप्यमृतं स्रवंतः ।

अक्षीणसंवासमहानसाश्च स्वस्ति क्रियासुः परमर्षयो नः ॥

(इति परमर्षिस्वस्तिमंगलविधानम्)

देव-शास्त्र-गुरु-पूजनम्

सार्वः सर्वज्ञनाथः सकलतनुभृतां पापसन्तापहर्ता, ।

त्रैलोक्याक्रांतकीर्तिः क्षतमदनरिपुर्घातिकर्मप्रणाशः ।

श्रीमान्निर्वाणसंपद्वरयुवतिकरालीढकंठैः सुकंठै-

र्देवेंद्रैर्वंद्यपादो जयति जिनपतिः प्राप्तकल्याणपूजः ॥ १ ॥

जय जय जय श्रीसत्कांतिप्रभो जगतां पते !

जय जय भावानेव स्वामी भवांभसि मज्जताम् ।

जय जय महामोहध्वांतप्रभातकृतेऽर्चनम् ।

जय जिनेश त्वं नाथ प्रसीद करोम्यहम् ॥ २ ॥

ओं ह्रीं भगवज्जिनेंद्र ! अत्र अवतर अवतर । संवौषट्

ओं ह्रीं भगवज्जिनेंद्र ! अत्र तिष्ठ तिष्ठ । ठः ठः ।

ओं ह्रीं भगवज्जिनेंद्र ! अत्रसमसन्निहितो भव भव । वषट्

देवि श्रीश्रुतदेवते भगवति ! त्वत्पादपंकेरुह-

द्वंद्वे यामि शिलीमुखत्वमपरं भक्त्यामया प्रार्थ्यते ।

मातश्चेतसि तिष्ठ मे जिनमुखोद्भूते सदा त्राहि माम्,

दृग्दानेन मयि प्रसीद भवतीं संपूजयामोऽधुना ॥ ३ ॥

ओं ह्रीं जिनमुखोदुभूतद्वादशांगश्रुतज्ञान ! अत्र अवतर अवतर । संवौषट्

ओं ह्रीं जिनमुखोद्भूतद्वादशांगश्रु तज्ञान ! अत्र तिष्ठ तिष्ठ । ठः ठः ।

ओं ह्रीं जिनमुखोद्भूतद्वादशांगश्रुतज्ञान ! अत्र मम सन्निहितो भव भव । वषट् ।

संपूजयामि पूज्यस्य पादपद्मयुगं गुरोः ।

तपः प्राप्तप्रतिष्ठस्य गरिष्ठस्य महात्मनः ॥ ४ ॥

ओं ह्रीं आचार्योपाध्यायसर्वसाधुसमूह ! अत्र अवतर अवतर संव०

ओं ह्रीं आचार्योपाध्यायसर्वसाधुसमूह ! अत्र तिष्ठ तिष्ठ । ठः ठः

ओं ह्रीं आचार्योपाध्यायसर्वसाधुसमूह अत्र मम सन्निहितो भव २ वषट् ।

देवेंद्रनागेंद्रनरेंद्रवंद्यान् शुम्भत्पदान् शोभितसारवर्णान् ।
दुग्धाब्धिसंस्पर्धिगुणैर्जलोघैर्जिनेंद्रसिद्धांतयतीन् यजेऽहम् ॥

ॐ ह्रीं परब्रह्मणेऽनन्तानन्तज्ञानशक्तये अष्टादशदोषरहिताय षट्चत्वारिंशद्गुणसहिताय अर्हत्परमेष्ठिने जन्ममृत्युविनाशनाय जलं निर्वपामीति स्वाहा ।

ॐ ह्रीं श्री जिनमुखोद्भूतस्याद्वादनयगर्भितद्वादशांगश्रुतज्ञानाय जन्ममृत्युविनाशनाय जलं निर्वपामीति ।

ॐ ह्रीं सम्यग्दर्शनज्ञानचारित्रादिगुणविराजमानाचार्योपाध्यायसर्वसाधुभ्यो जन्ममृत्युविनाशनाय जलं निर्वपामीति स्वाहा ।

ताम्यत्त्रिलोकोदरमध्यवर्तिसमस्तसत्वाहितहारिवाक्यान् ।
श्रीचंदनैर्गंधविलुब्धभृंगैर्जिनेंद्रसिद्धांतयतीन् यजेऽहम् ॥२॥

संसारतापविनाशनाय चंदनं निर्वपामीति स्वाहा ।

अपारसंसारमहासमुद्रप्रोत्तारणे प्राज्यतरीन् सुभक्त्या ।
दीर्घाक्षतांगैर्धवलाक्षतौघैर्जिनेन्द्रसिद्धांतयतीन् यजेऽहम् ॥३॥

अक्षयपदप्राप्तये अक्षतान् निर्वपामीति स्वाहा ।

विनीतभव्याब्जविबोधसूर्यान्वर्यान् सुचर्याकथनैकधुर्यान् ।
कुंदारविन्दप्रमुखैः प्रसूनैर्जिनेन्द्रसिद्धांतयतीन् यजेऽहम् ॥४॥

कामबाणविध्वंसनाय पुष्पं निर्वपामीति स्वाहा ।

कुदर्पकंदर्पविसर्प्पसर्प्पप्रसह्यनिर्णाशनवैनतेयान् ।
प्राज्याज्यसारैश्चरुभी रसाढ्यैर्जिनेंद्रसिद्धांतयतीन् यजेऽहं ॥५॥

क्षुधारोगविनाशनाय नैवेद्यं निर्वपामीति स्वाहा ।

ध्वस्तोद्यमांधीकृतविश्वविश्वमोहांधकारप्रतिघातदीपान् ।

दीपैः कनत्कांचनभाजनस्थैर्जिनेंद्रसिद्धांतयतीन् यजेऽहं ॥६॥

मोहान्धकारविनाशनाय दीपं निर्वपामीति स्वाहा ।

दुष्टाष्टकर्मेन्धनपुष्टजालसंधूपने भासुरधूमकेतून् ।

धूपैर्विधूतान्यसुगंधगंधैर्जिनेंद्रसिद्धांतयतीन् यजेऽहम् ॥७॥

अष्टकर्मदहनाय धूपं निर्वपामीति स्वाहा ।

क्षुभ्याद्विलुभ्यन्मनसाप्यगम्यान्

कुवादिवादाऽस्खलितप्रभावान् ।

फलैरलं मोक्षफलाभिसारै-

र्जिनेंद्रसिद्धांतयतीन् यजेऽहम् ॥८॥

मोक्षफलप्राप्तये फलं निर्वपामीति स्वाहा ।

सद्वारिगंधाक्षतपुष्पजातैर्नैवेद्यदीपामलधूपधूम्रैः ।

फलैर्विचित्रैर्घनपुण्ययोगान् जिनेंद्रसिद्धांतयतीन् यजेऽहम्॥६॥

अनर्घ्यपदप्राप्तये अर्घं निर्वपामीति स्वाहा ।

ये पूजां जिननाथशास्त्रयमिनां भक्त्या सदा कुर्वते ।

त्रैसंध्यं सुविचित्रकाव्यरचनामुच्चारयन्तो नराः ।

पुण्याढ्याः मुनिराजकीर्तिसहिताः भूत्वातपोभूषणा-

स्ते भव्याःसकलावबोधरुचिरां सिद्धिं लभन्ते पराम् ॥१॥

इत्याशीर्वादः (पुष्पाञ्जलिं क्षिपामि)

वृषभोऽजितनामा च संभवश्चाभिनंदनः ।
सुमतिः पद्मभासश्च सुपार्श्वो जिनसत्तमः ॥१॥
चंद्राभः पुष्पदंतश्च शीतलो भगवान्मुनिः ।
श्रेयांश्च वासुपूज्यश्च विमलो विमलद्युतिः ॥२॥
अनंतो धर्मनामा च शांति कुंथुर्जिनोत्तमः ।
अरश्च मल्लिनाथश्च सुव्रतो नमितीर्थकृत् ॥३॥
हरिवंशसमुद्भूतोऽरिष्टनेमिर्जिनेश्वरः ।
ध्वस्तोपसर्गदैत्यारिः पार्श्वो नागेद्रपूजितः ॥४॥
कर्मान्तकृन्महावीरः सिद्धार्थकुलसंभवः ।
एते सुरासुरौघेण पूजिता विमलत्विषः ॥५॥
पूजिता भरताद्यैश्च भूपेन्द्रैर्भूरिभूतिभिः ।
चतुर्विधस्य संघस्य शांतिं कुर्वन्तु शाश्वतीम् ॥६॥
जिनेभक्तिर्जिने भक्तिर्जिने भक्ति सदाऽस्तु मे ।
सम्यक्त्वमेव संसारवारणं मोक्षकारणम् ॥७॥

(पुष्पाञ्जलि क्षिपामि)

श्रुते भक्तिः श्रुते भक्तिः श्रुते भक्तिः सदाऽस्तु मे ।
सज्ज्ञानमेव संसारवारणं मोक्षकरणम् ॥८॥

(पुष्पाञ्जलि क्षिपामि)

गुरौ भक्तिर्गुरौ भक्तिर्गुरौ भक्तिः सदाऽस्तु मे ।

चारित्रमेव संसारवारणं मोक्षकारणम् ॥९॥

(पुष्पाञ्जलिं क्षिपामि)

देवजयमाला प्राकृत

वत्ताणुट्ठाणे जणधणुदाणे पइपोसिउ तुहु खत्तधरु ।
तुहु चरण विहाणे केवलणाणे तुहु परमप्पउ परमपरु ॥१॥
जय रिसहरिसीसर णमियपाय । जय अजिय जियंगमरो-सराय ॥ जय संभव संभवकयवियोय । जय अहिणंदण णंदिय पओय ॥२॥ जय सुमइ सुमइसम्मयपयास, जय पउमप्पह पउमाणिवास ॥ जय जयहि सुपास सुपासगत्त । जय चंदप्पह चंदाहवत्त ॥३॥ जय पुप्फयंत दंतंतरंग । जय सीयल सीयलवयणभंग ॥ जय सेय सेयकिरणोहसुज्ज । जय वासुपुज्ज पुज्जाण पुज्ज ॥४॥ जय विमल विमलगु-णसेढिठाण जय जयहि अणंताणंतणाण । जय धम्म धम्म-तित्थयर संत । जय सांति सांति विहियायवत्त ॥५॥ जय कुंथु कुंथुपहुअंगिसदय । जय अर अर माहर विहियसम-य ॥ जय मल्लि मल्लि आदामगंध । जय मुणिसुव्वयसुव्व-यणिबंध ॥६॥ जय णमि णमियामरणियरसामि । जय णेमि धम्मरहचक्कणेमि । जय पास पासछिंदणकिवाण । जय वड्ढमाण जसवड्ढमाण ॥७॥

घत्ता—इह जाणिय णामहिं दुरियविरामहिं परहिंवि णमिय सुरावलिहिं। अणहणहिं अणाइहिं समिय कुवाइहिं पणविवि अरहंतावलिहिं ॥

ॐ ह्रीं वृषभादिमहावीरान्तचतुर्विंशतिजिनेभ्यो अर्घं निर्व०

शास्त्रजयमाला।

संपइसुहकारण कम्मवियारण भवसमुद्दतारणतरणं। जिणवाणि णमस्समि सत्तिपयासमि सग्गमोक्खसंगमकरणं ॥१॥ जिणंदमुहाओ विणिग्गयतार। गणिंदविगुंफिय गंथपयार ॥ तिलोयहिमंडण धम्मह खाणि। सया पणमामि जिणिंदहवाणि ॥२॥ अवग्गह ईह अवाय जु एहिं। सुधारणा भेइहिं तिण्णि सएहिं ॥ मई छत्तीस बहुप्पमुहाणि। सया पणमामि जिणिंदह वाणि ॥३॥ सुदं पुण दोण्णि अणेयपयार। सुबारहभेय जगत्तयसार ॥ सुरिंदणरिंदसमुच्चिय जाणि। सया पणमामि जिणिंदह वाणि ॥४॥ जिणिंदगणिंदणरिंदह रिद्धि। पयासइ पुण्ण पुराकिउलद्धि ॥ णिउग्गुपहिल्लउ एहु वियाणि। सया पणमामि जिणिंदह वाणि ॥५॥ जु लोय अलोयह जुत्ति जणेइ। जु तिण्णि विकालसरूव भणेइ ॥ चउग्गइ लक्खण दुज्जउ जाणि। सया पणमामि जिणिंदह वाणि ॥६॥ जिणिंदचरित्तविचित्त

मुणेइ । सुसांवहिधम्मह जुत्ति जणेइ ॥ णिउग्गु वि तिज्जउ इत्थु वियाणि । सया पणमामि जिणिंदह वाणि ॥७॥ सुजीव अजीवह तच्चह चक्खु । सुपुण्ण विपाव विबंध विमुक्खु ॥ चउत्थुणिउग्गुविभासिय जाणि । सया पण-मामि जिणिंदह वाणि ॥८॥ तिभेयहिं ओहिविणाणविचित्तु । चउत्थरिजोविउलं मइउत्तु ॥ सुखाइय केवलणाण वियाणि । सया पणमामि जिणिंदह वाणि ॥९॥ जिणिंदह णाणु जग-त्तत भाणु । महातमणासिय सुक्खणिहाणु ॥ पयच्चउ भत्तिभरेण वियाणि । सया पणमामि जिणिंदह वाणि ॥१०॥ पयाणि सुवारहकोडि सयेण । सुलक्ख तिणासिय जुत्ति भरेण ॥ सहस अट्ठावण पंच वियाणि । सया पण-मामि जिणिंदह वाणि ॥११॥ इक्कावण कोडिउ लक्ख अठेव । सहसचुलसीदियसा छक्केव ॥ सढाइगवीसह गंथ-पयाणि । सया पणमामि जिणिंदह वाणि ॥१२॥

घत्ता—इह जिणवरवाणि विशुद्धमई । जो भवियण णियमण धरई । सो सुरणरिंद संपइ लहई । केवलणाण वि उत्तरई ॥१३॥

ॐ ह्रीं श्रीजिनमुखोद्भूतस्याद्वादनयगर्भितद्वादशांगश्रुतज्ञानायार्घं निर्वपामीति स्वाहा ।

गुरु जयमाला

भवियह भवतारण, सोलहकारण, अज्जवि तित्थयरत्तणहं ।
तवकम्म असंगइ दयधम्मंगइ पालवि पंच महव्वयहं ॥१॥

वंदामि महारिसि सीलवंत । पंचेंद्रियसंजम जोगजुत्त ॥
जे ग्यारह अंगह अणुसरंति । जे चउदह पुव्वह मुणि थुणंति ॥२॥ पदाणु सारवर कुट्ठबुद्धि । उप्पण्णु जाह आयासरिद्धि ॥ जे पाणाहारी तोरणीय जे । रुक्खमूल आतावणीय ॥३॥ जे मोणिधाय चंदाहणीय । जे जत्थत्थवणि णिवासणीय ॥ जे पंचमहव्वय धरणधीर । जे समिदिगुत्ति पालणहि वीर ॥४॥ जे वड्ढहिं देहविरत्तचित्त । जे राय-रोमभयमोहचित्त ॥ जेकुगइहि संवरु विगयलोह । जे दुरियविणासणकामकोह ।५॥ जे जल्लमल्लतणलित्त गत्त । आरंभपरिग्गह जे विरत्त ॥ जे तिण्णकाल बाहर गमंति । छट्ठट्ठमदसमउ तउ चरंति ॥६॥ जे इक्कगास दुइगास लिंति जे णीरसभोयण रइ करंति ॥ ते मुणिवर बंदउं ठियमसाण, जे कम्मडहइ वर सुक्कझाण ॥७॥ बारहविह-संजम जे धरंति । जे चारिउ विकहा परिहरंति ॥ बावीस परीषह जे सहंति । संसारमहण्णउ ते तरंति ॥८॥ जे धम्मबुद्धि महियलि थुणंति । जे काउस्सग्गो णिसि गमंति ॥

जे सिद्धविलासणि अहिलसंति । जे पक्खमास आहार लिंति ॥ ६ ॥ गोदूहण जे वीरासणीय । जे धणुहसेज वज्जासणीय । जे तववलेण आयास जंति जे गिरि गुह-कंदरविवरथंति ॥१०॥ जे सत्तु मित्त समभाव चित्त । ते मुनिवर वंदउं जगपवित्त ॥ ११ ॥ जे सुज्झाणिज्झा एकचित्त । वंदामि महारिसि मोखपत्त ॥ रयणत्तयरंजिय सुद्धभाव । ते मुणिवर वंदउं ठिदिसहाव ॥१२॥

घत्ता—जे तपसूरा, संजमधीरा, सिद्धवधू अणुराईया । रयणत्तयरंजिय, कम्महगंजिय, ते ऋषिवरमय झाईया ॥

ॐ ह्रीं श्रीसम्यग्दर्शनज्ञानचरित्रगुणविराजमानाचार्योपाध्यायसाधु-समूहायार्घं निर्वपामीति स्वाहा ।

स्फुट अर्घ

उदकचंदनतंदुलपुष्पकैश्चरुसुदीपसुधूपफलार्घकैः ।
धवलमंगलगानरवाकुले जिनगृहे जिनराजमहं यजे ॥१॥

ॐ ह्रीं सीमंधरयुग्मंधरबाहुसुबाहुसंजातस्वयंप्रभऋषिभानन अनन्तवीर्यसूर्यप्रभविशालकीर्तिवज्रधरचंद्राननभद्रबाहुभुजंगम ईश्वर-नेमिप्रभवीरसेनमहाभद्रदेवयशअजितवीर्येतिविंशतिविद्यमानतीर्थङ्क-रेभ्योऽर्घं निर्वपामीति स्वाहा ।

कृत्याकृत्रिमचारुचैत्यनिलयान् नित्यं त्रिलोकीं गतान् ।

वंदे भावनव्यंतरान् द्युतिवरान् स्वर्गामरावासगान् ॥
सद्गंधाक्षतपुष्पदामचरुकैः सद्दीपधूपैः फलैर् ।
द्रव्यैर्नीरमुखैर्यजामि सततं दुष्कर्मणां शांतये ॥१॥

ॐ ह्रीं कृत्रिमाकृत्रिमचैत्यालयसंबंधिजिनबिंबेभ्योऽर्घ्यं निर्व०

वर्षेषु वर्षान्तरपर्वतेषु नन्दीश्वरे यानि च मंदरेषु ।
यावंति चैत्यायतनानि लोके सर्वाणि वंदे जिनपुंगवानाम् ॥

अवनितलगतानां कृत्रिमाकृत्रिमाणाम् ।
वनभवनगतानां दिव्यवैमानिकानाम् ॥
इह मनुजकृतानां देवराजार्चितानाम् ।
जिनवरनिलयानां भावतोऽहं स्मरामि ॥३॥

जंबूधातकिपुष्करार्धवसुधाक्षेत्रत्रये ये भवा-
श्चंद्रांभोजशिखंडिकंठकनकप्रावृड्घना भाजिनः ॥
सम्यग्ज्ञानचरित्रलक्षणधराः दग्धाष्टकर्मेन्धनाः ।
भूतानागतवर्तमानसमये तेभ्यो जिनेभ्यो नमः ॥४॥

श्रीमन्मेरौ कुलाद्रौ रजतगिरिवरे शाल्मलौ जम्बुवृक्षे,
वक्षारे चैत्यवृक्षे रतिकररुचिके कुंडले मानुषांके ।
इष्वाकारेऽञ्जनाद्रौ दधिमुखशिखरे व्यंतरे स्वर्गलोके,
ज्योतिर्लोकेऽभिवंदे भुवनमहितले यानि चैत्यालयानि ॥५॥

द्वौ कुंदेंदुतुषारहारधवलौ द्वाविंद्रनीलप्रभौ ।

द्वौ बन्धूकसमप्रभौ जिनवृषौ द्वौ च प्रियङ्गुप्रभौ ॥
शेषाः षोडशजन्ममृत्युरहिताः संतप्तहेमप्रभास् ।
ते मज्ज्ञानदिवाकराः सुरनुताः सिद्धिं प्रयच्छंतु नः ॥६॥

ॐ ह्रीं त्रिलोकसंबंधि-कृत्याकृत्रिमचैत्यालयेभ्योऽर्घं निर्वपा०

इच्छामि भंते चेइयभत्ति काओसग्गो कओतस्सालोचेओ अहलोय तिरियलोय उड्ढलोयम्मि किट्टिमाकिट्टिमाणि जाणि जिणचेयाणि ताणि सव्वाणि, तीसुवि लोयेसु भवणवासिय वाणविंतरजोयसियकप्पवासियत्ति चउविहा देवा सपरिवारा दिव्वेण गंधेण पुप्फेण दिव्वेण धुव्वेण दिव्वेण चुण्णेण दिव्वेण वासेण दिव्वेण ह्णाणेण णिच्चकालं अच्चंति पुज्जंति वंदंति णमस्संति । अहमवि इहसंतो तत्थसंताइ णिच्चकालं अच्चेमि पुज्जेमि वंदामि णमस्सामि दुक्खक्खओ कम्मक्खओ बोहिलाहो सुगइगमणं समाहिमरणं जिणगुणसंपत्ति होउ मज्झं ॥

(इत्याशीर्वादः । पुष्पाञ्जलिं क्षिपामि)

अथ पौर्वाह्णिक - माध्याह्णिक - अपराह्णिकदेव - वंदनायां पूर्वाचार्यानुक्रमेण सकलकर्मक्षयार्थं भावपूजावंदनास्तवसमेतं श्रीपंचमहागुरुभक्तिकायोत्सर्गं करोम्यहम् ।

णमो अरहंताणं । णमो सिद्धाणं णमो आइरीयाणं णमो

उवज्झायाणं, णमो लोए सव्वसाहूणं । तावकायं पावकम्मं दुच्चरियं वोस्सरामि ।

द्रव्यभावसिद्धपूजनम्

ऊर्ध्वाधोरयुतं सबिंदु सपरं ब्रह्मस्वरावेष्टितम् ।
वर्गापूरितदिग्गतांबुजदलं तत्संधितत्त्वान्वितम् ॥
अंतःपत्रतटेष्वनाहतयुतं ह्रींकारसंवेष्टितम् ।
देवं ध्यायति यः स मुक्तिसुभगो वैरीभकंठीरवः ॥

ॐ ह्रीं श्रीसिद्धचक्राधिपते ! सिद्धपरमेष्ठिन् ! अत्र अवतर अवतर संवौषट् । ॐ ह्रीं श्रीसिद्धचक्राधिपते ! सिद्धपरमेष्ठिन् ! अत्र तिष्ठ । ठःठः । ॐ ह्रीं श्रीसिद्धचक्राधिपते ! सिद्धपरमेष्ठिन् । अत्र मम सन्निहितो । भव भव । वषट् ।

निरस्तकर्मसंबधं, सूक्ष्मं नित्यं निरामयम् ।
वंदेऽहं परमात्मानममूर्तमनुपद्रवम् ॥१॥

सिद्ध-मन्त्र-स्थापनम्

सिद्धौ निवासमनुगं परमात्म्यगम्यम्,
हान्यादिभावरहितं भववीतकायम् ।
रेवापगावरसरोयमुनोद्भवानाम्,
नीरैर्यजेकलशगैर्वरसिद्धचक्रम् ॥

निजमनोमणिभाजनभारया, समरसैकसुधारसधारया ।

सकलबोधकलारमणीयकं, सहजसिद्धमहं परिपूजये ॥१॥
ओं ह्रीं सिद्धचक्राधिपतये सिद्धपरमेष्ठिने जन्ममृत्युविनाशनाय जलं नि०

आनंदकंदजनकं घनकर्ममुक्तं,
सम्यक्त्वशर्मगरिमं जननार्तिवीतम् ।
सौरभ्यवासितभुवं हरिचंदनानां,
गंधैर्यजे परिमलैर्वरसिद्धचक्रम् ॥

सहजकर्मकलंकविनाशनैरमलभावसुवासितचंदनैः ।
अनुपमानगुणावलिनायकं, सहजसिद्धमहं परिपूजये ॥२॥
ओं ह्रीं सिद्धचक्राधिपतये सिद्धपरमेष्ठिने संसारतापविनाशनाय चंदनं

सर्वावगाहनगुणं सुसमाधिनिष्ठं,
सिद्धं स्वरूपनिपुणं कमलं विशालम्-
सौगंध्यशालिवनशालिवराक्षतानां,
पुंजैर्यजे शशिनिभैर्वरसिद्धचक्रम् ॥

सहजभावसुनिर्मलतंदुलैः सकलदोषविशालविशोधनैः ।
अनुपरोधसुबोधनिधानकं, सहजसिद्धमहं परिपूजये ॥३॥
ओं ह्रीं सिद्धचक्राधिपतये सिद्धपरमेष्ठिने अक्षयपदप्राप्तये अक्षतम् ॥

नित्यं स्वदेहपरिमाणमनादिसंज्ञं,
द्रव्यानिपेक्षममृतं मरणाद्यतीतम् ।
मंदारकुंदकमलादिवनस्पतीनां,

पुष्पैर्यजे शुभतमैर्वरसिद्धचक्रम् ।।

समयसारसुपुष्पसुमालया सहजकर्मकरेण विशोधया ।
परमयोगबलेन वशीकृतं सहजसिद्धमहं परिपूजये ।।४।।
ओं ह्रीं सिद्धचक्राधिपतये सिद्धपरमेष्ठिने कामविध्वंसनाय पुष्पम्

ऊर्ध्वस्वभावगमनं सुमनोव्यपेतं,
ब्रह्मादिबीजसहितं गगनावभासम् ।
क्षीरान्नसाज्यवटकैः रसपूर्णगर्भै-
र्नित्यं यजे चरुवरैर्वरसिद्धचक्रम् ।।

अकृतबोधसुदिव्यनैवेद्यकैर्विहितजातजरामरणांतकैः ।
निरवधिप्रचुरात्मगुणालयं, सहजसिद्धमहं परिपूजये ।।५।।
ओं ह्रीं सिद्धचक्राधिपतये सिद्धपरमेष्ठिने नैवेद्यम्

आतंकशोकभयरोगमदप्रशांत-
निर्द्वंद्वभावधरणं महिमानिवेशं ।
कर्पूरवर्तिबहुभिः कनकावदातैर्,
दीपैर्यजे रुचिवरैर्वरसिद्धचक्रम् ।।

सहजरत्नरुचिप्रतिदीपकैः, रुचिविभूतितमः प्रविनाशनैः ।
निरवधिस्वविकाशप्रकाशनैः सहजसिद्धमहं परिपूजये ।।६।।
ओं ह्रीं सिद्धचक्राधिपतये सिद्धपरमेष्ठिने मोहांधकारविनाशनाय दीपम्

पश्यन्समस्तभुवनं युगपन्नितांतं,
त्रैकाल्यवस्तुविषये निविडप्रदीपम् ।

सद्द्रव्यगंधघनसारविमिश्रितानां,

धूपैर्यजे परिमलैर्वरसिद्धचक्रम् ॥

निजगुणाक्षयरूपसुधूपनैः स्वगुणघातिमलप्रविनाशनैः ।
विशदबोधसुदीर्घसुखात्मकं, सहजसिद्धमहं परिपूजये ॥७॥
ओं ह्रीं सिद्धचक्राधिपतये सिद्धपरमेष्ठिने अष्टकर्मदहनाय धूपम्

सिद्धासुराधिपतियक्षनरेंद्रचक्रै-

र्ध्येयं शिवं सकलभव्यजनैःसुवंद्यम् ।

नारिंगपूगकदलीवरनारिकेलैः

सोऽहं यजे वरफलैर्वरसिद्धचक्रम् ॥

परमभावफलावलिसंपदा, सहजभावकुभावविशोधया ।
निजगुणास्फुरणात्मनिरंजनं सहजसिद्धमहं परिपूजये ॥८॥
ओं ह्रीं सिद्धचक्राधिपतये सिद्धपरमेष्ठिने मोक्षफलप्राप्तये फलम्

गंधाढ्यं सुपयोमधुव्रतगणैः संगं वरं चंदनम् ।

पुष्पौघं विमलं सदक्षतचयं रम्यं चरुं दीपकम् ॥

धूपं गंधयुतं ददामि विविधं श्रेष्ठं फलं लब्धये ।

सिद्धानां युगपत्क्रमाय विमलं सेनोत्तरं वांछितम् ॥

नेत्रोन्मीलिविकाशभावनिवहैरत्यंतबोधाय वै ।
वार्गंधाक्षतपुष्पदामचरुकैः सद्दीपधूपैः फलैः ॥
यश्चिन्तामणिशुद्धभावपरमज्ञानात्मकैरर्चयेत् ।

सिद्धं स्वादुमगाधबोधमचलं संचर्चयामो वयम् ॥ ६ ॥

ओं ह्रीं सिद्धचक्राधिपतये सिद्धपरमेष्ठिने अर्घं निर्वपामीति स्वाहा

ज्ञानोपयोगविमलं विशदात्मरूपं,

सूक्ष्मस्वभावपरमं यदनंतवीर्यम् ।

कर्मौघकक्षदहनं सुखसस्यबीजं,

वंदे सदा निरुपमं वरसिद्धचक्रम् ॥ १० ॥

ॐ ह्रीं सिद्धचक्राधिपतये सिद्ध परमेष्ठिने महार्घं निर्व० स्वाहा ॥

त्रैलोक्येश्वरवंदनीयचरणाः प्रापुः श्रियं शाश्वतीम् ।

यानाराध्य निरुद्धचंडमनसः संतोऽपितीर्थंकराः ॥

सत्सम्यक्त्वविबोधवीर्यविशदाऽव्याबाधताद्यैर्गुणैर्

युक्तांस्तानिह तोष्टवीमि सततं सिद्धान् विशुद्धोदयान् ॥

(पुष्पाञ्जलि क्षिपामि)

जयमाला

विराग सनातन शांत निरंश । निरामय निर्भय निर्मल हंस ॥ सुधाम विबोधनिधान विमोह । प्रसीद विशुद्ध सुसिद्धसमूह ॥१॥ विदूरित-संसृतिभाव निरंग । समामृत-पूरित देव विसंग ॥ अबंधकषाय विहीनविमोह । प्रसीद विशुद्ध सुसिद्धसमूह ॥२॥ निवारितदुष्कृतकर्मविपास । सदामल केवलकेलिनिवास । भवोदधिपारग शान्तविमोह ।

प्रसीद विशुद्ध सुसिद्धसमूह ॥३॥ अनंतसुखामृतसागर धीर। कलंकरजोमलभूरिसमीर ॥ विखंडितकाम विरामविमोह। प्रसीद विशुद्ध सुसिद्धसमूह ॥४॥ विकारविवर्जित तर्जित-शोक। विबोधसुनेत्रविलोकितलोक ॥ विहार विराव विरंग विमोह प्रसीद विशुद्ध सुसिद्धसमूह ॥५॥ रजोमलखेदविमुक्त विगात्र। निरंतर नित्य सुखामृतपात्र ॥ सुदर्शनराजित नाथ विमोह। प्रसीद विशुद्ध सुसिद्धसमूह ॥६॥ नरामर-वंदित निर्मलभाव। अनंत मुनीश्वरपूज्य विहाव ॥ सदो-दय विश्वमहेश विमोह। प्रसीद विशुद्ध सुसिद्धसमूह ॥७॥ विदंभ वितृष्ण विदोष विनिद्र। पगत्परशंकरमार वितंद्र ॥ विकोप विरूप विशंक विमोह। प्रसीद विशुद्ध सुसिद्धसमूह ॥८॥ जरामरणोज्झित वीतविहार। विचिंतित निर्मल निर-हंकार ॥ अचिंत्यचरित्र विदर्प विमोह। प्रसीद विशुद्ध सुसिद्धसमूह ॥९॥ विवर्ण विगंध विमान विलोभ। विमाय विकाय विशब्द विशोभ ॥ अनाकुल केवल सर्वविमोह। प्रसीद विशुद्ध सुसिद्धसमूह ॥१०॥

असमसमयसारं चारुचैतन्यचिह्नं, परपरणतिमुक्तं पद्मनंदीन्द्रवंद्यम्। निखिलगुणनिकेतं सिद्धचक्रं विशुद्धं, स्मरति नमति यो वा स्तौति सो भ्येति मुक्तिम् ॥११॥

ॐ ह्रीं सिद्धचक्राधिपतये सिद्धपरमेष्ठिभ्यो महार्घं निर्वपामीति स्वाहा ।

सिद्धभक्तिविधानम् ।

यस्यानुग्रहतो दुराग्रहपरित्यक्त्वात्मरूपात्मनः
सद्द्रव्यचिदचित्त्रिकालविषयं स्वैः स्वैरभीक्ष्णं गुणैः ।
सार्थव्यंजनपर्ययैः समवयज्जानाति बोधः समम्
तत्सम्यक्त्वमशेषकर्मभिदुरं सिद्धान् परं नौमि वः ॥१॥

यत्सामान्यविशेषयोः सह पृथक् स्वान्यस्थयोर्दीपव-
च्चित्तं द्योतकमुद्धरन्मुदभरं नो रज्यति द्वेष्टि न ।
धाराव्याप्यपि तत्प्रतिक्षणनवीभावोद्धुरार्थार्पित-
प्रामाण्यं प्रणमामि वः फलितदृग्ज्ञप्त्युक्तिमुक्तिश्रिये ॥२॥

सत्तालोचनमात्रमित्यपि निराकारं मतं दर्शनम्
साकारं च विशेषगोचरमिति ज्ञानं प्रमादीच्छया ।
ते नेत्रे क्रमवर्तिनी सरजसां प्रादेशिके सर्वतः
स्फूर्जन्ती युगपत्पुनर्विरजसां युष्माकमंगातिगाः ॥३॥

शक्तिव्यक्तिविभक्तविश्वविविधाकारौघकर्मीरिता-
नंतानंतभवस्थमुक्तपुरुषोत्पादव्ययध्रौव्यव्ययात् ।
स्वं स्वं तत्त्वमसंकरव्यतिकरं कर्तुं नु क्षणं प्रत्यथो
प्रोत्क्षणमन्वयतः स्मरामि परमाश्चर्यस्य वीर्यस्य वः ॥४॥

यद्व्याहंति न जातु किंचिदपि न व्याहन्यते केनचि-
द्यन्निष्पीतसमस्तवस्त्वपि सदा केनापि न स्पृश्यते ।
यत् सर्वज्ञसमक्षमप्यविषयं तस्यापि चार्थाद्गिराम्
तद्वः सूक्ष्मतमं स्वतत्त्वमभि वा भाव्यं भवोच्छित्तये ॥५॥

गत्वा लोकशिरस्य धर्मवशतश्चंद्रोपमे सन्मुख-
प्राग्भाराख्यशिलातलोपरि मनागूनैकगव्यूतिके ।
योगोज्झांगदरो न मित्यपि मिथो संबाधमेकत्र य-
ल्लब्ध्यानंतमितोपि तिष्ठथ स वः पुण्यावगाहो गुणः ॥६॥

सिद्धाश्चेद्गुरवो निराश्रयतया भ्रश्यंत्ययःपिंडव-
त्तेऽधश्चेल्लघवोर्कतूलवदितश्चेतश्च चंडेन तत् ।
क्षिप्यंते तनुवातवातवलयेनेत्युक्ति युक्त्युद्धतै-
र्नामोपज्ञमपीष्यते गुरुलघुः क्षुद्रैः कथं वो गुणः ॥७॥

यत्तापत्रयहेतिभैरवभवोदर्चिः शमाय श्रमो
युष्माभिर्विदधे व्यपच्यत तदव्याबाधमेतद्ध्रुवम् ।
येनोद्वेलसुखामृतार्णवनिरातंकाभिषेकोल्लस-
च्चित्कायान् कलयापि वः कलयितुं श्राम्यंति योगीश्वराः ॥

एतेनंतगुणाद्गुणाः स्फुटमयोदधृत्याष्ट दिष्टा भव-
तत्त्वा भावयितुं सतां व्यवहृतिप्राधान्यतस्तात्त्विकैः ।
एतद्भावनया निरंतरगलद्वंकल्पजालस्य मे

स्तादत्यंतलयः सनातनचिदानंदात्मनि स्वात्मनि ॥९॥
उत्कीर्णामिव वर्तितामिव हृदि न्यस्तामिवालोकय-
न्नेतां सिद्धगुणस्तुतिं पठति यः शश्वच्छिवाशाधरः ।
रूपातीतसमाधिसाधितवपुः पातः पतद्दुष्कृत-
व्रातः सोभ्युदयोपभुक्तसुकृतः सिद्ध्येत् तृतीये भवे ॥१०॥

पुष्पांजलिपूजनम्

प्रथमं सुदर्शनमेरुपूजनम्

जिनान् संस्थापयाम्यत्रा—ह्वानानादिविधानतः ।
सुदर्शनविधिं पूजां, पुष्पांजलिविशुद्धये ॥१॥

ॐ ह्रीं सुदर्शनमेरुसम्बन्धिजिनचैत्यालयस्थजिनप्रतिमासमूह ! अत्र अवतर अवतर संवौषट् ।

ॐ ह्रीं सुदर्शनमेरुसम्बन्धिजिनचैत्यालयस्थजिनप्रतिमासमूह ! अत्र तिष्ठ तिष्ठ ठ. ठ. ।

ॐ ह्रीं सुदर्शनमेरुसम्बन्धिजिनचैत्यालयस्थजिनप्रतिमासमूह ! अत्र मम सन्निहितो भव भव वषट् ।

स्वधुनीजलनिर्मलधारया,
विशदकांतिनिशाकरभारया ।
प्रथममेरुसुदर्शनदिग्स्थितान्,
यजत षोडशनित्यजिनालयान् ॥१॥

ॐ ह्रीं सुदर्शनमेरुसम्बन्धि-भद्रशाल—नन्दन—सौमनस पांडुकवनसंम्बन्धिपूर्वदक्षिणपश्चिमोत्तरस्थजिनचैत्यालयस्थजिनबिम्बेभ्यो जलं निर्वपामीति स्वाहा ।

मलयचंदनमर्दितसद्द्रवैः, सुरभिकुंकुमसौरभमिश्रितैः ।
प्रथममेरुसुदर्शन० चंदनम् ॥
असकलैरमलैः शुभशालिजै-र्विधुकरोज्ज्वलकांतिभिरक्षतैः ।
प्रथममेरुसुदर्शन० अक्षतम् ॥
अमरपुष्पसुवारिजचंपकै-र्बकुलमालतिकेतकिसंभवैः ।
प्रथममेरुसुदर्शन० पुष्पम् ॥
घृतवरादिसुगंधिचरूत्करैः, कनकपात्रार्चितै रसनाप्रियैः ।
प्रथममेरुसुदर्शन० नैवेद्यम् ॥
मणिघृतादिवरैर्वरदीपकै,-स्तरलदीप्तिविरोचितदिग्गणैः ।
प्रथममेरुसुदर्शन० दीपम् ॥
अगुरुदेवतरूद्भवधूपकैः, परिमलोद्गमधूपितविष्टपैः ।
प्रथममेरुसुदर्शन० धूपम् ॥
क्रमुकदाडिमनिम्बुकसत्फलैः, प्रमुखपक्वफलैः सरसोत्तमैः ।
प्रथममेरुसुदर्शन० फलम् ॥
विमलसलिलधाराशुभ्रगंधाक्षतौघैः, कुसुमनिकरचारुवेष्ट-

नैवेद्यवर्गैः। प्रहततिमिरदीपैर्धूपधूम्रैः फलैश्च, रजतरचितमर्घं रत्नचंद्रो भजेऽहम्। अर्घम्॥

जयमाला।

जम्बूद्वीपधरास्थितस्य सुमहामेरोश्च पूर्वादिषु, दिग्भागेषु चतुर्षु षोडशमहाचैत्यालये सद्वनैः। नानाच्मा(?)जविभूषितैर्मणिमयैर्भद्रादिशालांतकैः, संयुक्तस्य निवासिनो जिनवरान् भक्त्या स्तवीमि स्तवैः॥१॥ जन्मदूरा नता देवचक्रैर्निष्कलाः, स्वेदवीताः सदा क्षीरदेहाकुलाः। मेरुसंबंधिनो वीतरागा जिनाः संतु भव्योपकाराय संपूजिताः॥२॥ शुद्धवर्णांकिताः शुद्धभावोद्धराः रत्नत्रयोज्वलाः सद्गुणैर्निर्भराः॥ मेरु० ।३। मानमायातिगा मुक्तिभावोद्धराः, शुद्धसद्बोधशंकादिदोषाहराः मेरु० ।४। क्षुत्तृषामोहकक्षेषु दावानलाः, प्रोल्लसद्बोधदीपाः सुधांशूत्कराः। मेरु०।५। पूर्णचंद्राभतेजोभिः निर्निवेशकाः चंद्रसूर्य्यप्रतापाः करावेशकाः। मेरु० ।६॥

इतिरचितफलौघाः प्राप्तसुज्ञानपाराः, हततमघनपापाः नम्रसर्वामरेन्द्राः। गतनिखिलविलापाः कान्ति-दीप्ता जिनेन्द्रा, अपगतघनमोहाः सन्तु सिद्ध्यै जिनेन्द्रा ॥७॥

ॐ ह्रीं सुदर्शनमेरुसम्बन्धिभद्रशाल–नन्दन—सौमनस—पांडुक—वनसम्बन्धिपूर्वदक्षिणपश्चिमोत्तरस्थजिनचैत्यालयस्थजिनबिम्बेभ्यः

पूर्णार्घं निर्वपामीति स्वाहा ॥

सर्वव्रताधिपं सारं, सर्वसौख्यकरं सताम् ।

पुष्पांजलिव्रतं पुष्याद्युष्माकं शाश्वतीं श्रियम् ।८॥

[इत्याशीर्वादः]

द्वितीयविजयमेरुपूजनम्

जिनान्संस्थापयाम्यत्रा—ह्वानानादिविधानतः ।

धातुकीखंडपूर्वाशा,—मेरोविजयवर्तिनः ॥ १ ॥

ॐ ह्रीं विजयमेरुसम्बन्धिजिनप्रतिमासमूह ! अत्र अवतर अवतर०

ॐ ह्रीं विजयमेरुसम्बन्धिजिनप्रतिमासमूह ! अत्र तिष्ठ तिष्ठ ठ. ठ.

ॐ ह्रीं विजयमेरुसम्बन्धिजिनप्रतिमासमूह ! अत्र मम सन्निहितो भव भव वषट् ।

सुतोयैः सुतीर्थोद्भवैर्धौतदोषैः,

सुगांगेयभृंगारनालाम्यसंगैः ।

द्वितीयं सुमेरुं शुभं धातुकीस्थम्,

यजे रत्नबिम्बोज्ज्वलं रत्नचन्द्रः ॥ १ ॥

ॐ ह्रीं विजयमेरुसम्बन्धिभद्रशाल— नन्दन —सौमनस—पाडुव वनसंबन्धिपूर्व—दक्षिणपश्चिमोत्तरस्थजिनचैत्यालयस्थजिनबिम्बेभ्यो जलं निर्वपामीति स्वाहा ।

सुगंध्यागतालिव्रजैःकुंकुमादिद्रवैश्चन्दनश्चंद्रपूर्णाभिगमैः ।

द्वितीयं सुमेरुं० । गंधम् ।

सुशाल्यक्षतैरक्षतैर्दिव्यदेहैः, सुगंधाक्षतारब्धभृंगारगानैः ।
द्वितीयं सुमेरुं० । अक्षतम् ।
लवंगैः प्रसूनैस्ततामोदवद्भिः, सुमंदारमालापयोजादिजातैः ।
द्वितीयं सुमेरुं० । पुष्पम् ।
मनोज्ञैः सुखाद्यैर्गवीनाज्यतप्तैः, सुशाल्योदनैर्मोदकैर्मंड-
काद्यैः । द्वितीयं सुमेरुं० । नैवेद्यम् ।
प्रदीपैर्हतध्वांतरत्नादिभूतैः, ज्वलत्कीलजातैर्भ्रशं भासुरैश्च ।
द्वितीयं सुमेरुं० । दीपम् ।
सुधूपैः सुगन्धीकृताशापमूहैभ्र मद्भृंगयूथैः शुभैश्च-
न्दनाद्यैः । द्वितीयं सुमेरुं० । धूपम् ।
शुभैर्मोचचोचाम्रजंबीरकाद्यैर्मनोभीष्टदानप्रदैः सत्फलाद्यैः ।
द्वितीयं सुमेरुं० । फलम् ।
विशुद्धैरष्टमद्द्रव्यै—रर्घमुत्तारयाम्यहम् ।
हेमपात्रस्थितं भक्त्या जिनानां विजयौकमाम् । अर्घ्यम् ।

जयमाला

सकलकलिलमुक्ताः सर्वसंपत्तियुक्ता
गणधरगणसेव्याः कर्मपंकप्रणष्टाः ।
प्रहतमदनमानास्त्यक्तमिथ्यात्वपाशाः
कलितनिखिलभावास्ते जिनेन्द्रा जयंतु ॥१॥

विमोह विसारितकामभुजंग, अनेकसदाविधिभाषितभंग ।
कषायदवानलतत्त्वसुरंग, प्रसीद जिनोत्तम मुक्तिप्रसंग ॥२॥
निरीह निरामय निर्मलहंस, सुचामरभूषितशुद्धसुवंस ।
अनिद्यचरित्र विमानितकंस, प्रसीद जिनोत्तम मुक्तिप्रसंग ॥३॥
प्रबोध विबोधजगत्त्रयसार, अनंतचतुष्टयसागरपार ।
निवारित सर्वपरिग्रहभार, प्रसीद जिनोत्तम मुक्तिप्रसंग ॥४॥
तपोभरदारितकर्मकलंक, विरोग विभोग वियोग विशंक ।
अखंडित चिन्मयदेहप्रकाश, प्रसीद जिनोत्तम मुक्तिप्रसंग ।५।
विवर्जितदोष गुणौघकरंड, प्रसारितमान तपोमददंड ।
अपारभवोदधितारतरंड, प्रसीद जिनोत्तम मुक्तिप्रसंग ॥६॥

दृगवगमचरित्राः प्राप्तसंसारपाराः,
सकलशशिनिभासाः सर्वसौख्यादिवासाः ।
विदितविभवशिष्टाः प्रोल्लसद्ज्ञानशिष्टाः,
ददतु जिनवरास्ते मुक्तिसाम्राज्यलक्ष्मीम् ॥७॥

ॐ ह्रीं विजयमेरुसम्बन्धिभद्रशाल—नन्दन—सौमनस—पांडुकवन सम्बन्धिपूर्वदक्षिणपश्चिमोत्तरस्थजिनचैत्यालयस्थजिनबिम्बेभ्यः पूर्णार्घ्यं निर्वपामीति स्वाहा ।

सर्वव्रताधिपं सारं सर्वसौख्यकरं सताम् ।

पुष्पांजलिव्रतं पुष्याद्युष्माकं शाश्वतीं श्रियम् ॥८॥

(इत्याशीर्वादः)

तृतीयं अचलमेरुपूजनम् ।

जिनान्संस्थापयाम्यत्रा–ह्वानानादिविधानतः ।

धातुकीपश्चिमाशास्थाचलमेरुप्रवर्तिनः ॥१॥

ॐ ह्रीं अचलमेरुसंबंधिजिनप्रतिमासमूह ! अत्र अवतरावतर ।
ॐ ह्रीं अचलमेरुसंबंधिजिनप्रतिमासमूह ! अत्र तिष्ठ तिष्ठ ठः ठः
ॐ ह्रीं अचलमेरुसंबंधिजिनप्रतिमासमूह ! अत्र मम सन्निहितो भव भव वषट् ।

सौरभ्याहृतसद्गंधसारया जलधारया ।

अचलमेरुजिनेंद्राय जराजन्मविनाशिने ॥ जलम् ॥

चारुचंदनकर्पूरकाश्मीरादिविलेपनैः । अचल० । चंदनम् ।

अक्षतैरक्षतानंदसुखध्यानविधानकैः । अचल० । अक्षतम् ।

जातिकुन्दादिराजीवचंपकानेकपल्लवैः । अचल० । पुष्पम् ।

स्वाद्यमाद्यपदैः स्वाद्यैः मन्नाद्यैः सुकृतैरिव ।अ०। नैवेद्यम् ।

दशाग्रैः प्रस्फुरद्दीपैर्दीपैः पुण्यजनैरिव । अ० । दीपम् ।

धूपैः संधूपितानेककर्मभिधूमदायिभिः । अ० । धूपम् ।

नारिकेलादिभिः पुंगैः फलैः पुण्यजनैरिव । अ० । फलम् ।

जलगन्धाक्षतानेकपुष्पनैवेद्यदीपकैः । अ० । अर्घ्यम् ।

जयमाला

श्रीधातकीखण्डविदेहसंस्थं तृतीयमेरुं सुरसङ्घयुक्तम् ।
शुम्भत्प्रदीपोत्कररत्नबन्धं संस्तौम्यहं सद्गुणरत्नमालम् ॥

श्रितखेचरकिन्नरदेवगणं यात्रागतयतिवरचरणरणम् ।
नानाविधिरचनारचितप्रभं वन्दे गिरिराजमहं महितम् ॥
मणिभूषितपार्श्वयुगं वलयं सुविराजितजिनप्रतिमानिलयम् ।
जिनवरमङ्गलगुणगानरवं वन्दे गिरिराजमहं महितम् ॥
विबुधाश्रितविविधविकारहरं भविकामलभावितभावधरम् ।
संभवदुज्ज्वलगुणगणनिकरं वन्दे गिरिराजमहं महितम् ॥
सिंहासनभावितधवलशिलं क्षीरार्णवजलभरधौततलम् ।
नानाविभवं जनतापहरं वन्दे गिरिराजमहं महितम् ॥

विविधमणिनिबद्धं भूगतं भद्रशालम्
कनकरचितपार्श्वं बद्धसोपानपंक्तिम् ॥
स्फटिकविमलसान्द्रं पाण्डुकावासदेशम् ।
गिरिवरमहमर्चे भावनाभिस्समर्घैः ॥

ॐ ह्रीं श्रीतृतीयाचलमेरुस्थजिनचैत्यालयस्थजिनबिम्बेभ्यो अनर्घ्यपदप्राप्तये महार्घं निर्वपामीति स्वाहा ।

सर्वव्रताधिपं सारं सर्वसौख्यकरं नृणाम् ।

पुष्पाञ्जलिव्रतं पुष्यात् युष्माकं शाश्वतीं श्रियम् ॥

(इत्याशीर्वादः)

(सिरिसन्ताने रिसह जिणजाई अजित जिणंद जिणंदह पयकमलो । इह कुसुमांजलि होइ मनोहर मेलहिया, गिरिकैलासे जाइपहारे मेलहिया ॥१॥ संभवजिण सेवंतिसही, अहि अहिनन्दन मेह जिणंद जिणंदह पयकमलो । इह कुसुमांजलि० ॥२॥ सुमति जे सुमति देहु जिण, पउमप्पह जिनदेव जिणंदह पयकमलो । इह कुसुमांजलि० ॥३॥ मंदारिहि सुपासजिन चन्दप्पह चम्पेह जिणंदह पयकमलो । इह कुसुमां० । ४ । पुप्पदन्त परमेष्ठिजिन, सीतल सीय जिणंद जिणंदह पयकमलो । ५ । जिनश्रेयांसह असोयपही, वासुपूज्य वउलेह जिणंदह पयकमलो । इह कुसु० । ६ । विमलभण्डारी सुरतरही, शुक्लवेहि जिणंद जिणंदह पयकमलो । इह कुसु० । ७ । बहुमचकुन्दहिं धर्मजिन, रत्नप्पह जिणशांति जिणंद जिणंदह पयकमलो । इहकुसु० । ८ । युत्तय फुल्लय कुन्थुजिण, अर जिन पास जिणंद जिणंदह पयकमलो । इहकुसु० ।६। मल्लिय हुल्लिय मल्लिजिणु मुनिसुव्रत जिनहुल्ल जिणंदह

पयकमलो । इह० । १० । नमि जिनवर केवलयाहो, जांप अजितजिणंद जिणंदह पयकमलो । इह० । ११ । पाड-लहुल्लिय पासजिन, वड्ढमान कमलोहि जिणंद जिणंदह पयकमलो । इह० । १२ । पावनेहु पुज्जहु अवले अवनि अवरअभयारि जिणंदह पयकमलो । इह० । १३ । गुरुपय-पुज्जह तिन्निलए, अवरु न पडहु संसार जिणंदह पय-कमलो । इह० । १४ । इहरयणांजुलि विणयमहु, जो जिणनाहि होइ जिणंदह पयकमलो । इह० । १५ । भाद्र-वशुक्ल सुपंचमिह पंच दिवस कारेइ, जिणंदह पयकमलो । इह कुसुमांजलि होइ मनोहर मेलहिया गिरिकैलासे जाइ पहारे मे लहिया । १६ ।)

यावंति जिनचैत्यानि विद्यंते भुवनत्रये ।
तावंति सततं भक्त्या त्रिपरीत्य नमाम्यहम् ।१७।

ॐ ह्रीं अचलमेरुसंबंधिभद्रशाल—नन्दन—सौमनस—पांडुकवन सम्बन्धिपूर्वदक्षिणपश्चिमोत्तरस्थजिनचैत्यालयस्थ-जिनबिम्बेभ्यः । पर्णार्घं निर्वपामीति स्वाहा ॥

सर्वव्रताधिपं सारं सर्वसौख्यकरं सताम् ।
पुष्पांजलिव्रतं पुष्याद्युष्माकं शाश्वतीं श्रियम् ।१।

इत्याशीर्वादः ,

चतुर्थं मन्दिरमेरुपूजनम् ।

जिनान्संस्थापयाम्यत्राह्वानानादिविधानतः ।
मेरुमन्दिरनामस्थान, पुष्पांजलिविशुद्धये । १ ।

ॐ ह्रीं मंदिरमेरुसबंधिजिनप्रतिमासमूह ! अत्र अवतर अवतर ।
ॐ ह्रीं मंदिरमेरुसबंधिजिनसमूह ! अत्र तिष्ठ तिष्ठ ठ. ठः ।
ॐ ह्रीं मंदिरमेरुसबंधिजिनप्रतिमासमूह ! अत्र मम सन्निहितो भव भव वषट् ।

गंगागतैर्जलचयैः सुपवित्रतांगैः, रम्यैः सुशीतलतरैर्भवतापभेद्यैः । मेरुं यजेऽखिलसुरेंद्रसमर्चनीयं, श्रीमंदिरं विततपुष्करद्वीपसंस्थम् ।

ॐ ह्रीं मंदिरमेरुसंबंधिभद्रशाल—नन्दन–सौमनस-पांडुकवनसंबंधिपूर्वदक्षिणपश्चिमोत्तरस्थजिनचैत्यालयस्थजिनबिम्बेभ्यो जलं निर्वपामीति स्वाहा ॥

काश्मीरकुंकुमरसैर्हरिचन्दनाद्यैः, गन्धोत्कटैर्वनभवैर्घनसारमिश्रैः । मेरुं यजेऽखिलसुरेंद्रसमर्चनीयं, श्रीमंदिरं विततपुष्करद्वीपसंस्थम् । २ । चन्दनम् ।

चन्द्रांशुगौरविहितैः कलमाक्षतौघै-र्घ्राणप्रियैरवितथैर्विमलैरखण्डैः । मेरुं यजेऽखिलसुरेंद्रसमर्चनीयं, श्रीमंदिर विततपुष्करद्वीपसंस्थम् । ३ । अक्षतम्

गन्धागतालिनिवहैः शुभचम्पकादि,—पुष्पोत्करैरमरपुष्प-युतैर्मनोज्ञैः । मेरुं यजेऽखिलसुरेंद्रसमर्चनीयं, श्रीमंदिरं विततपुष्करद्वीपसंस्थम् ॥ ४ ॥ पुष्पम् ।

स्वर्णादिपात्रनिहितैर्घृतपक्वखण्डैर्नानाविधैर्घृतवरै रसनेंद्रियेष्टैः । मेरुं यजेऽखिलसुरेन्द्रसमर्चनीयं, श्रीमन्दिरं विततपुष्करद्वीपसंस्थम् ॥५॥ नैवेद्यम् ।

कर्पूरदीपनिचयैर्निहतांधकारैः—रुद्भासिनीशनिकरैःशुभकीलजालैः । मेरुं यजेऽखिलसुरेंद्रसमर्चनीयं, श्रीमन्दिरं विततपुष्करद्वीपसंस्थम् ॥६॥ दीपम् ।

कालागुरुत्रिदशदारुसुचंदनादि,—द्रव्योद्भवैः शुभगगंधसुधूपधूम्रैः । मेरुं यजेऽखिलसुरेंद्रसमर्चनीयं, श्रीमन्दिरं विततपुष्करद्वीपसंस्थम् ॥७॥ धूपम् ।

नारिंगपुंगपनसाम्रसुमोचचोचैः श्रीलांगलप्रमुखभव्यफलैः सुरम्यैः । मेरुं यजेऽखिलसुरेंद्रसमर्चनीयं, श्रीमन्दिरं विततपुष्करद्वीपसंस्थम् ॥८॥ फलम् ॥

जलैःसुगंधाक्षतचारुपुष्पै,-र्नैवेद्यदीपैर्वरधूपवर्गैः ।
फलैर्महार्घं ह्यवतारयामि, श्रीरत्नचन्द्रो यतिवृंद-सेव्यम् ॥९॥ अर्घम् ॥

जयमाला ।

प्रोद्यत्षोडशलक्षयोजनमितश्रीपुष्कराद्धं स्थितः,
श्रीमत्पूर्वविदेहमंदिरगिरिर्देवेंद्रवृन्दार्चितः ॥
चंचत्पंचसुवर्णरत्नजटितो नानाप्रमोदोर्जित-
स्तत्संबंधिजिनौकसां गुणगणान् संस्तौम्यहं सर्वदा ।

देवविद्याधराधीश्वरैः चर्चितं किन्नरीगीतकलगानसंजृंभितम् । नर्तितानेकदेवांगनासुन्दरं, श्रीजिनागारवारं भजे भासुरम् । ॥२॥ जन्मकल्याणसंमोहितामरबलं, दर्शितानेकदेवांगना-सुन्दरम् । प्रोल्लसत्केतुमालालयैः सुन्दरं, श्रीजिनागारवारं भजे भासुरम् ॥३॥ धूपघटधूपितावासशोभावरं, रत्नसंभर्जि-तालीभिराशाकुलम् । अष्टमंगलमहाद्रव्यचयसुन्दरं, श्रीजिना-गारवारं भजे भासुरम् ॥४॥ तालवीणामृदंगादिपटहस्वरं, कल्पतरुपुष्पवापीतडागैर्वरम् । चारणर्द्धिमुनिवरसंगताशाधरं, श्रीजिनागारवारं भजे भासुरम् ॥५॥ रुचिरमणिमयैर्गोपुरैः शोभातिगं प्रेमहर्म्यावलीमुक्तिमालाभृतम् । तुंगतोरणलसद्-घंटिकाभंगुरं, श्रीजिनागारवारं भजे भासुरम् ॥६॥

विविधविषयभाव्यं भव्यसंसारतारं, शतमखशतपूज्यं प्राप्तसज्ज्ञानपारम् । विषयविषमदुष्टव्यालपक्षीशमीशं, जिनवरनिकरं तं रत्नचन्द्रोभजेऽहम् ॥

ॐ ह्रीं मंदिरमेरुसम्बन्धिभद्रशाल—नंदन—सौमनस—पांडुकवन सम्बन्धिपूर्वदक्षिणपश्चिमोत्तरस्थजिनचैत्यालयस्थजिनबिम्बेभ्योपूर्णार्घं निर्वपामीति स्वाहा ।

सर्वव्रताधिपं सारं सर्वसौख्यकरं सताम् ।
पुष्पांजलिव्रतं पुष्याद्युष्माकं शाश्वतीं श्रियम् ॥८॥
(इत्याशीर्वादः)

पंचमं विद्युन्मालिमेरुपूजनम् ।

जिनान्संस्थापयाम्यत्राह्वानानादिविधानतः ।
पुष्करे पश्चिमाशास्थान, विद्युन्मालीप्रवर्तिन: ॥१॥

ॐ ह्रीं विद्युन्मालिमेरुसम्बन्धिजिनप्रतिमासमूह ! अत्र अवतर अवतर, संवौषट् ।

ॐ ह्रीं विद्युन्मालिमेरुसम्बन्धिजिनप्रतिमासमूह ! अत्र तिष्ठ तिष्ठ ठः ठः ।

ओं ह्रीं विद्युन्मालिमेरुसम्बन्धिजिनप्रतिमासमूह ! अत्र मम सन्निहितो भव भव वषट् ।

निर्मलैः सुशीतलैर्महापगाभवैर्वनैः
शातकुंभकुंभगैर्जगज्जनांगतापहैः ।
जैनजन्ममज्जनांभसाप्लवातिपावनं,
पंचमं सुमंदिरं महाम्यहं शिवप्रदम् ॥ १ ॥

ओं ह्रीं विद्युन्मालिमेरुसम्बन्धिभद्रशाल-नंदन-सौमनस—पांडुक वनसम्बन्धिपूर्वदक्षिणपश्चिमोत्तरस्थ जिनचैत्यालयस्थजिनबिम्बेभ्यो जन्ममृत्युविनाशनाय जलं निर्वपामीति स्वाहा ॥ १ ॥

चन्दनैः सुचन्द्रसारमिश्रितैः सुगंधिभिरर्कवेणुमूलभूत-वर्जितैर्गुणोज्वलैः । जैनजन्ममज्जनांभसाप्लवातिपावनं पंचमं सुमंदिरं महाम्यहं शिवप्रदम् ॥ २ ॥ चंदनम् ॥

इन्दुरश्मिहारयष्टिहेमभासभासितैः रक्षतैरखंडितैः सुलक्षितै-र्मनःप्रियैः । जैनजन्ममज्जनांभसाप्लवातिपावनं पंचमं सुमंदिरं महाम्यहं शिवप्रदम् ॥ ३ ॥ अक्षतम्

गंधलुब्धषट्पदैः सुपारिजातपुष्पकैः पारिजातकुन्ददेवपुष्प-मालतीभवैः । जैनजन्ममज्जनांभसाप्लवातिपावनं पंचमं सुमंदिरं महाम्यहं शिवप्रदम् ॥ ४ ॥ पुष्पम् ॥

प्राज्यपूरपूरितैः सुखज्जकैः सुमोदकैः इन्द्रियप्रसादकैः सु-चारुभिश्चरूत्करैः । जैनजन्ममज्जनांभसाप्लवातिपावनं पञ्चमं सुमन्दिरं महाम्यहं शिवप्रदम् ॥ ५ ॥ नैवेद्यम् ॥

अन्धकारभारनाशकारणैर्दशेंधनैः रत्नसोमजैः प्रदीप्तिभूषितैः शिखोज्वलैः । जैनजन्ममज्जनांभसाप्लवातिपावनं पञ्चमं सुमन्दिरं महाम्यहं शिवप्रदम् ॥ ६ ॥ दीपम् ॥

सिल्हिकागुरूद्भवैः सुधूपकैर्नभोगतैः गंधवासचक्रकेश

वृन्दकैः गुणोज्वलैः। जैनजन्ममज्जनांभसाप्लवातिपावनं पञ्चमं सुमन्दिरं महाम्यहं शिवप्रदम् ॥ ७ ॥ धूपम् ॥

आम्रदाडिमैः सुमोचचोचकैः शुभैः फलैः, मातुलिंगनारिकेर पूर्गानम्बुकादिभिः। जैनजन्ममज्जनांभसाप्लवातिपावनं पञ्चमं सुमन्दिरं महाम्यहं शिवप्रदम् ॥ ८ ॥ फलम् ॥

जलगंधाक्षतैः पुष्पैश्चरुदीपसुधूपकैः।

फलैरुचारयाम्यर्घं विद्युन्मालिप्रवर्तिनाम् ॥९॥ अर्घम्

जयमाला।

संस्तुवे मन्दिरं पञ्चमं सुसद्गुणं सुमुक्त्यंगचैत्यालयं भासुरांगम्। चलद्रत्नसोपानविद्याधरीशं, नमो देवनागेंद्रमर्त्येन्द्रवृन्दम् ।१। भद्रशालाभिधारण्यसंशोभितं, कोकिलानां कलालापसंकूजितम्। पुष्कराद्धचिलासंस्थितं मन्दिरं, चञ्चलामालिनं पूजये सुन्दरम् ॥२॥ नन्दनैर्नन्दितानेकलोकाकरै,- र्भ्राजमानं सदाशोकवृक्षोत्करैः ॥पुष्क० ॥३॥ सौमनस्यैर्वनैः कल्पवृक्षादिभिः-र्भ्राजमानं बुधागारकेत्वादिभिः पुष्क० ।४। ऊर्ध्वगैः पांडुकैः काननैः राजितं, पांडुकाख्याशिलाभिः समालिंगितम्। पुष्क०। ५। निर्जितानेकरत्नप्रभाभासुरं, दिक्चतुष्काश्रिताहत्प्रभाभासुरम्। पुष्कराद्धचिलासंस्थितं मन्दिरं, चंचलामालिनं पूजये सुन्दरम् ॥६॥

घण्टातोरणतालिकाब्जकलशैः छत्राष्टद्रव्यैः परैः,
श्रीभामंडलचामरैः सुरचितैः चन्द्रोपकरणादिभिः ।
त्रैकाल्ये वरपुष्पजाप्यजपनैर्जैनाकरोत्वर्च्यतां,
भव्यैर्दानपरायणैः कृतदयैः पुष्पांजलेः शुद्धये ॥७॥

ह्रीं विद्युन्मालिमेरुसम्बन्धिभद्रशाल-नंदन-सौमनस-पांडुक वनसंबंधिपूर्वदक्षिणपश्चिमोत्तरस्थजिनचैत्यालयस्थजिनबिम्बेभ्यो । अर्घं निर्वपामीति स्वाहा ॥

सर्वव्रताधिपं सारं सर्वसौख्यकरं सताम् ।
पुष्पांजलिव्रतं पुष्याद्युष्माकं शाश्वतीं श्रियम् ॥

(इत्याशीर्वादः)

विधुवसुरसचन्द्रांकैः प्रयुक्ते कृतार्चा शरदि नभासे मासे रत्नचन्द्रश्चतुर्थ्याम् । धवलभृगुसुवारे सांगवादे पुरेत्र जिनवृषगगलादिश्रावकादेशतोऽव्यात् ।

(इत्याशीर्वादः)

पंचमेरुसमुच्चयपूजनम्

संवौषडाहूय निवेश्य ठाभ्यां सान्निध्यमानीय वषट्पदेन ।
श्रीपंचमेरुस्थजिनालयानां यजाम्यशीतिप्रतिमाः समस्ताः ॥

ॐ ह्रीं पंचमेरुस्थितजिनचैत्यालयस्थजिनबिंब ! अत्र अवतर अवतर संवौषट्, अत्र तिष्ठ तिष्ठ ठः ठः, अत्र मम सन्निहितो भव भव वषट् ।

अथाष्टकम् ।

सुसिंधुमुख्याखिलतीर्थसार्था-बुभिः शुभांभोजरजोभिरामैः ।
श्रीपञ्चमेरुस्थजिनालयानां, यजाम्यशीतिप्रतिमाः समस्ताः ।

आद्यः सुदर्शनो मेरुर्विजयश्चाचलस्तथा ।
चतुर्थो मन्दरो नाम विद्युन्माली सुपञ्चमः ॥

ॐ ह्रीं पंचमेरुस्थचैत्यालयस्थजिनविम्बेभ्यो जन्ममृत्युविना० जलम्

कर्पूरपूरस्फुरदत्युदारैः सौरभ्यसारैर्हरिचन्दनाद्यैः ।
श्रीपञ्चमेरुस्थजिनालयानां यजाम्यशीतिप्रतिमाः समस्ताः ।

ॐ ह्रीं पंचमेरुसंबंधिजिनचैत्यालयस्थजिनविंबेभ्यः संसार० चंदनम्

शाल्यक्षतैः कैरवकुड्मलानां गुणत्रयेण भ्रममात्रहद्भिः ।
श्रीपंञ्चमेरुस्थजिमालयानां, यजाम्यशीतिप्रतिमाः समस्ताः ।

ॐ ह्रीं पञ्चमेरुसम्बन्धिजिनचैत्यालयस्थजिनविम्बेभ्यो अक्षतम्

प्रधानसंतानकमुख्यपुष्प-सुगंधिताभ्च्छदतुच्छभृङ्गैः ।
श्रीपञ्चमेरुस्थजिनालयानां यजाम्यशीतिप्रतिमाः समस्ताः ।

ॐ ह्रीं पञ्चमेरुसम्बन्धिजिनचैत्यालयस्थजिनविम्बेभ्यो पुष्पम ।

सद्यस्तनैः क्षीरघृतेक्षुमुख्यैः सद्द्रव्यभव्यैश्चरुभिः सुगन्धैः ॥
श्रीपञ्चमेरुस्थजिनालयानां० ॥ नैवेद्यम् ॥

तमोविनाशप्रकटीकृतार्थै-र्दीपैरशेषज्ञवचोनुरूपैः ।
श्रीपंचमेरुस्थ० ॥ दीपम् ॥

स्वपापरक्षःपरिणाशधूम्रै रिवोरुकृष्णागरुधूपधूम्रैः ।
श्रीपंचमेरुस्थ० ॥ धूपम् ॥

नारिंगमुख्याखिलवृक्षपक्वफलैः सुगंधैः सरसैः सुवर्णैः ।
श्रीपंचमेरुस्थ० ॥ फलम् ॥

वागंधपुष्पाक्षतदीपधूपनैवेद्यदूर्वाफलवद्भिरर्घैः ।
श्रीपंचमेरुस्थ० ॥ अर्घम् ॥

जयमाला

अर्धपुष्करपर्यंन्तमेरुस्थितजिनालयान् ।
नमामि सततं भक्त्या सम्यक्त्वस्य विशुद्धये ॥

जन्मदूरा नता देवकैर्निष्कलाः स्वेदवीताः सदा क्षीरदेहाकुलाः । मेरुसंबधिनो वीतरागा जिनाः संतु भव्योपकाराय संपूजिताः ॥ शुद्धवर्णांकिताः शुद्धभावोद्धुराः रत्नवर्णोज्ज्वलाः सद्गुणैर्निर्भराः ॥ मेरुसम्बन्धिनो वीतरागा जिना सन्तु भव्योपकाराय सम्पूजिताः ॥ मानमायातिगा मुक्तिभावोद्धुरा, शुद्धसद्बोधशंकादिदोषाहराः ॥ मेरु० ॥ क्षुत्पिपा-मोहकक्षेषु दावानलाः, प्रोल्लसद्बोधदीपाः सुधांशूत्कराः ॥ मेरु० ॥ पूर्णचंद्राभतेजोभिः निर्निवेशकाः चंद्रसूर्य प्रतापाः करावेशकाः ॥ मेरु० ॥

इतिरचितफलौघाः प्राप्तसुज्ञानपाराः,
हततमघनपापाः नम्रसर्वामरेन्द्राः ।

गतनिखिलविलापाः कान्तिदीप्ता जिनेन्द्राः

अपगतघनमोहाः सन्तु सिद्ध्यै जिनेन्द्राः ॥

ॐ ह्रीं सुदर्शन-विजय-अचल-मन्दिर-विद्युन्मालीतिपंचमेरुस्थजिनालयस्थस्थजिनबिम्बेभ्यो पूर्णार्घं निर्वपामीति स्वाहा ।

नन्दीश्वरद्वीपपूजनम् ।

स्थानासनार्घ्यप्रतिपत्तियोग्यैं, भद्रावसन्मानजलादिभिश्च ।
लक्ष्मीसुतागमनवीर्यसुदर्भगर्भैः, संस्थापयामि भुवनाधिपतिं-
जिनेंद्रम् ॥

ॐ ह्रीं नन्दीश्वरद्वीपे द्विपञ्चाशज्जिनालयस्थप्रतिमासमूह ! अत्र अवतर अवतर संवौषट्, । अत्र तिष्ठ तिष्ठ ठ: ठ: । अत्र मम सन्निहितो भव भव वषट् ।

अथाष्टकम् ।

तीर्थोदकैर्मणिसुवर्णघटोपनीतैः, पीठे पवित्रवपुषि प्रविकल्पि-
तार्थैः । नन्दीश्वरद्वीपजिनालयार्च्यान् समर्चये चाष्टदि-
नानि भक्त्या ।

ॐ ह्रीं नन्दीश्वरद्वीपे पूर्वदिग्भागे एक अंजनगिरिचतुर्दधिमुखाष्टरतिकरेति त्रयोदशजिनालयेभ्यो जलं निर्वपामीति स्वाहा ,

ॐ ह्रीं नन्दीश्वरद्वीपे दक्षिणदिग्भागे त्रयोदशजिनालयेभ्यो जलं निर्वपामीति स्वाहा ।

ॐ ह्रीं नन्दीश्वरद्वीपे पश्चिमदिग्भागे त्रयोदशजिनालयेभ्यो जलं निर्वपामीति स्वाहा ।

ॐ ह्रीं नन्दीश्वरद्वीपे उत्तरदिग्भागे त्रयोदशजिनालयेभ्योजलं निर्वपामीति स्वाहा ।

श्रीखण्डकर्पूरसुकुंकुमाद्यैर्गन्धैः सुगंधीकृतदिग्विभागैः । नंदी-
श्वरद्वीपजिनालयार्च्यान् समर्चये० चन्दनम् ।

शाल्यक्षतैरक्षतदीर्घगात्रैः सुनिर्मलैश्चन्द्रकरावदातैः ।
नन्दीश्वरद्वीपजिनालयार्च्यान् समर्चये० अक्षतम् ।

अंभोजनीलोत्पलपारिजातैः कदंबकुंदादितरुप्रसूनैः ।
नन्दीश्वरद्वीपजिनालयार्च्यान् समर्चये० पुष्पम् ॥

नैवेद्यकैः कांचनपात्रसंस्थैर्न्यस्तैरुदस्तैर्हरिणा सुहस्तैः
नन्दीश्वरद्वीजिनालयार्च्यान्० नैवेद्यम् ।

दीपोत्करैर्ध्वस्ततमोवितानैरुद्योतिताशेषपदार्थजातैः ।
नन्दीश्वरद्वीप० दीपम् ।

कर्पूरकृष्णागरुचन्दनाद्यैर्धूपैर्विचित्रैर्वरगंधयुक्तैः ।
नन्दीश्वरद्वीप० । धूपम् ॥

लवङ्गनारिंगकपित्थपूगश्रीमोघचोचादिफलैः पवित्रैः ।
नन्दीश्वरद्वीप० । फलम् ।

श्रीचन्दनाढ्याक्षततोयमिश्रैर्विकाशिपुष्पांजलिना सुभक्त्या ।

यजे त्रिकालोद्भवजैनविम्बान् भक्त्या स्वकर्मक्षयहेतवेऽहम् ।
ओं ह्रीं नन्दीश्वरद्वीपस्थजिनालयजिनविम्बेभ्यो अर्घम् नि०
श्रीचन्दनाढ्याक्षततोयमिश्रैर्विकाशिपुष्पांजलिना सुभक्त्या ।
सद्भावनावासजिनालयस्थान् जिनेन्द्रविम्बान्प्रयजे मनोज्ञान्
ॐ ह्रीं भावनामरजिनालयेभ्योऽर्घं निर्वपामीति स्वाहा ।
श्रीचन्दनाढ्याक्षततोयमिश्रैर्विकाशिपुष्पांजलिना सुभक्त्या ।
जम्ब्वाख्यद्वीपस्थजिनालयस्थान् जिनेन्द्रविंबान् प्रयजे मनोज्ञान् ॥
ॐ ह्रीं जंबूद्वीपस्थजिनालयस्थजिनविंबेभ्योऽर्घं निर्वपामीति स्वाहा ।
श्रीचन्दनाढ्याक्षततोयमिश्रैर्विकाशिपुष्पांजलिना सुभक्त्या ।
श्रीधातकीखण्डजिनालयस्थान् जिनेंद्रविंबान् प्रयजे मनोज्ञान् ॥
ॐ ह्रीं धातकीखंडद्वीपस्थजिनालयजिनविंबेभ्योऽर्घं निर्वपामीति० ।
श्रीचन्दनाढ्याक्षततोयमिश्रैर्विकाशिपुष्पांजलिना सुभक्त्या ।
श्रीपुष्करद्वीपजिनालयस्थान् जिनेन्द्रविंबान् प्रयजे मनोज्ञान् ॥
ॐ ह्रीं पुष्करार्द्धद्वीपस्थजिनालयजिनविंबेभ्योऽर्घं निर्वपामीति० ।
श्रीचन्दनाढ्याक्षततोयमिश्रैर्विकाशिपुष्पांजलिना सुभक्त्या ।
सत्कुंडलाद्रिस्थजिनालयस्थान् जिनेंद्रविंबान्प्रयजे मनोज्ञान् ॥
ॐ ह्रीं कुण्डलगिरिद्वीपस्थजिनालयस्थजिनबिंबेभ्योऽर्घं निर्वपामीति०

श्रीचन्दनाढ्याक्षततोयमिश्रैर्विकाशिपुष्पांजलिना सुभक्त्या ।
श्रीमन्नगे वै रुचिके हि संस्थान् जिनेंद्रबिंबान् प्रयजे मनो-
ज्ञान् ॥

ॐ ह्रीं रुचिकगिरिस्थजिनालयबिंबेभ्योऽर्घं निर्वपामीति स्वाहा ॥

श्रीचन्दनाढ्याक्षततोयमिश्रैर्विकाशिपुष्पांजलिना सुभक्त्या ।
सद्व्यंतराणां निलयेषु संस्थान् जिनेंद्रबिंबान्प्रयजे मनो-
ज्ञान् ॥

ॐ ह्रीं अष्टप्रकारव्यन्तरदेवानां गृहेषु जिनालयबिंबेभ्योऽर्घं नि० ।

श्रीचन्दनाढ्याक्षततोयमिश्रैर्विकाशिपुष्पांजलिना सुभक्त्या ।
चन्द्रार्कताराग्रहऋक्षज्योतिष्माणां यजे वै जिनबिंबवर्यान् ॥

ॐ ह्रीं पंचप्रकारज्योतिष्काणां देवानां गृहेषु जिनालयस्थजिन
बिंबेभ्योऽर्घं निर्वपामीति स्वाहा ॥

कल्पेषु कल्पातिगकेषु चैव देवालयस्थान् जिनदेवबिंबान् ।
सन्नीरगन्धाक्षतमुख्यद्रव्यैर्यजे मनोवाक्तनुभिर्मनोज्ञान् ॥

ॐ ह्रीं कल्पकल्पातीतसुरविमानस्थजिनबिंबेभ्योऽर्घं निर्वपामीति० ।

कृत्याकृत्रिमचारुचैत्यनिलयान्नित्यं त्रिलोकीं गतान्,
बन्दे भावनव्यंतरद्युतिवरस्वर्गामरावासगान् ॥
सद्गन्धाक्षतपुष्पदामचरुकैः सद्दीपधूपैः फलै-
र्द्रव्यैर्नीरमुखैर्यजामि सततं दुष्कर्मणां शांतये ॥

ॐ ह्रीं कृत्याकृत्रिमजिनालयस्थजिनबिंबेभ्योऽर्घं निर्वपामीति०

वर्षेषु वर्षान्तरपर्वतेषु नन्दीश्वरे यानि च मन्दरेषु।
यावन्ति चैत्यायतनानि लोके सर्वाणि वन्दे जिनपुङ्गवानां॥
अवनितलगतानां कृत्रिमाकृत्रिमाणां वनभवनगतानां दिव्यवैमानिकानाम्। इह मनुजकृतानां देवराजार्चितानां जिनवरनिलयानां भावतोऽहं स्मरामि॥

जम्बूधातकिपुष्करार्धवसुधाक्षेत्रत्रये ये भवा-
श्चंद्राम्भोजशिखंडिकण्ठकनकप्रावृड्घनाभाजिनः।
सम्यग्ज्ञानचरित्रलक्षणधरा दग्धाष्टकर्मेन्धनाः
भूतानागतवर्तमानसमये तेभ्यो जिनेभ्यो नमः॥

श्रीमन्मेरौ कुलाद्रौ रजतगिरिवरे शाल्मलौ जम्बुवृक्षे, वक्षारे चैत्यवृक्षे रतिकररुचके कुण्डले मानुषांके। इष्वाकारेंजानाद्रौ दधिमुखशिखरे व्यंतरे स्वर्गलोके, ज्योतिर्लोकेऽभिवन्दे भुवनमहितले यानि चैत्यालयानि॥ द्वौ कुन्देंदुतुषारहारधवलौ द्वाविंद्रनीलप्रभौ, द्वौ बन्धूकसमप्रभौ जिनवृषौ द्वौ च प्रियंगुप्रभौ। शेषाः षोडश जन्ममृत्युरहिताः सन्तप्तहेमप्रभास्ते सज्ज्ञानदिवाकरा सुरनुताः सिद्धिं प्रयच्छन्तु नः॥
णोकोडिसया पणवीसा त्रेपणलक्खाण सहससत्ताईसा।
णोसेते पडियाला जिणपडिमाकिट्टिमा वन्दे॥

ओं ह्रीं कृत्रिमाकृत्रिमचैत्यायालस्थजिनबिंबेभ्योऽर्घं निर्वपामीति०

[अतीतचतुर्विंशतितीर्थंकरनामानि]

निर्वाणसागराभिख्यो माधुर्यो विमलप्रभः ।
शुद्धवाक् श्रीधरो धीरो दत्तनाथोऽमलप्रभः ॥१॥
उद्धराह्वोग्निनाथश्च संयमः शिवनायकः ।
पुष्पांजलिर्जगत्पूज्यस्तथा शिवगणाधिपः ॥२॥
उत्साही ज्ञाननेता च महनीयो जिनोत्तमः ।
विमलेश्वरनामान्यो यथार्थश्च यशोधरः ॥३॥
कर्मसंज्ञोऽपरो ज्ञान—मतिः शुद्धमतिस्तथा ।
श्रीभद्रपदकांतश्चातीता एते जिनाधिपाः ॥४॥
नमस्कृतसुराधीशैर्महीपतिभिरर्चिताः ।
वन्दिता धरणेंद्राद्यैः सन्तु नः सिद्धिहेतवे ॥५॥

ओं ह्रां अतीतचतुर्विंशतितीर्थंकरेभ्योऽर्घं निर्वपामीति स्वाहा ॥

[वर्तमानचतुर्विंशतितीर्थंकरनामानि]

ऋषभोऽजितनामा च संभवश्चाभिनन्दनः ।
सुमतिः पद्मभासश्च सुपार्श्वो जिनसत्तमः ॥१॥
चन्द्राभः पुष्पदन्तश्च शीतलो भगवान्मुनिः ।
श्रेयांसो वासुपूज्यश्च विमलो विमलद्युतिः ॥२॥
अनन्तो धर्मनामा च शांतिकुन्थू जिनोत्तमौ ।

अरश्च मल्लिनाथश्च सुव्रतो नमितीर्थकृत् ॥३॥

हरिवंशसमुद्भूतोऽरिष्टनेमिर्जिनेश्वरः ।

ध्वस्तोपसर्गदैत्यारिः पार्श्वो नागेन्द्रपूजितः ॥४॥

कर्मांतकृतन्महावीरः । सिद्धार्थकुलसंभवः ।

एते सुरासुरौघेण पूजिता विमलत्विषः ॥५॥

पूजिता भरताद्यैश्च भूपेंद्रैर्भूरिभूतिभिः ।

चतुर्विधस्य संघस्य शांतिं कुर्वंतु शाश्वतीम् ॥

ओं ह्रीं वर्तमानविंशतिजिनेभ्योऽर्घं निर्वपामीति स्वाहा ॥

[अनागततीर्थंकरनामानि]

तीर्थंकृच्च महापद्मः सूरदेवो जिनाधिपः । सुपार्श्वनामधेयोऽन्यो यथार्थश्च स्वयंप्रभुः ॥१॥ सर्वात्मभूत इत्यन्यो देवदेवप्रभोदयः । उदयः प्रभ्रकीर्तिश्च जयकीर्तिश्च सुव्रतः ॥२॥ अरश्च पुण्यमूर्तिश्च निष्कषायो जिनेश्वरः । विमलो निर्मलाभिख्यश्चित्रगुप्तो वरः स्मृतः ॥३॥ समाधिगुप्तनामान्यौ स्वयंभूरनिवर्तकः । जयो विमलसंज्ञश्च दिव्यपाद इतीरितः ॥४॥ चरमोऽनंतवीर्योऽमी वीर्यधैर्यादिसद्गुणाः । चतुर्विंशतिसंख्याका भविष्यत्तीर्थकारिणः ॥५॥

ओं ह्रीं अनागतचतुर्विंशतिजिनेभ्योऽर्घं निर्वपामीति स्वाहा ।

जयमाला ।

कम्पिल्लाणयरीमंडणस्स विमलस्स विमलणाणस्स ।
आरत्तिय वरसमये णच्चंति अमररमणीओ ॥

अमररमणीउ णच्चंति जिणमन्दिरं । विविहवर तालतूरहिं सुचंगमपुरं ॥ जडियबहुरयणचामीयरं पत्तयं । जोइयं सुन्दरं जिणप आरत्तियं ॥१॥ रुणझडंकारणवरघचलणुट्ठि-या । मोत्तियादाम वच्छच्छले संठिया । गीय गायंति णच्चंति जिणमन्दिरं, जोइयं सुन्दरं० ॥३॥ केशभरिकुसु-मचयसरसढोलंतिया । वयण छणइंदसमकंतवियसंतिया । कमलदलणयण जिणवयणपेखंतिया । जोइयं सुन्दरं० ॥४॥ इंदधारिणिंदजक्खेंदवोहंतिया । मिलिव सुर असुर घणरासि खेलंतिया । के वि सियचमर जिणविम्ब ढोलंतिया । जोइयं सुन्दरं० ॥५॥

गाथा—णंदीसुरम्मि दीवे बावण्णजिणालयेसु पडिमाणं ।
अट्ठाहिवरपव्वे इंदो आरत्तियं कुणई ॥६॥

इन्द आरत्तियं कुणइ जिणमन्दिरं, रयणमणिकिरणकमलेहिं वरसुन्दरं । गीय गायंति णच्चंति वरणाडियं तूर वज्जंति णाणाविहम्माडियं ॥७॥

गाथा—एक्केक्कम्मि य जिणहरे अट्ठसय सोलहवा-

वाओ । जोयणलक्खपमाणं अट्ठमे णंदीसुरे दीवे ॥ ८ ॥

अट्ठमं दीवणंदीसुरं भासुरं । चैत्यचैत्यालये वन्दि अमरासुरं । देवदेवोउ जह धम्म संतोसिया, पंचमं गाय गायंति रसपोसिया ॥ ६ ॥

गाथा-दिव्वेहि खीरणीरेहिं गन्धड्ढाहि कुसुममालाहि ।
सव्वसुरलोयसहिया पुज्जा आरम्भए इंदो ॥१०॥

इन्दसोहम्मिसग्गावज्जोसयं, आयऊ सज्जि ऐरावयं वरगयं । सव्वदव्वेहिं भव्वेहिं पूजाकरा, मिलिव पडिवक्खया तस्स तिहु देसया ॥ ११ ॥

गाथा-कंसालतालतिवली, झाल्लरभरभेरिवेणुविरणाओ ।
वज्जंति भावसहिया भव्वेहिं णउज्जिया सव्वे ॥१२॥

सव्वदव्वेहि भव्वेहि करताडियं, सद्दए संझिगण झिगण-णिद्धडयं । गिझिनिझं झिगिनिझं वज्जये झल्लरी, णच्चये इन्दइन्दायणी सुन्दरी ॥१३॥ णयण कज्जलसलायामगं दिण्णयं, हेमहीरालयं कुण्डलं कङ्कणं ॥ झंझणं झङ्करं तं-पि ये णेवरं, जिणपआरत्तियं जोइयं सुन्दरं ॥ १४ ॥ दिट्ठिया, सग्गि अङ्ग लियदावंतिया, खिणहिं खिण खिणहिं जिण विंब जोइंतिया ॥ णारि णच्चंति गायंति

कोइलसुरं, जिणप आरत्तियं जोइयं सुन्दरं । रुणुभुणं-
कारणेवरघकरकङ्कणं, णाइ जंपंति जिणणाहवं वहुगुणं ॥
जुवइ णच्चांति सुमरन्ति ण उ णियधरं, जिणपआरत्तियं
जोइयं सुन्दरं ॥ कण्ठकदलीह मणिहार झुल्लंतऊ जिणइ
थुई थुई सो णाय सन्तुट्ठऊ । विविहकोऊहलं रयहि णारी-
यरं, जिणपआरत्तियं जोइयं सुन्दरं ।
आरत्तिय जोवइ कम्मइ धोवइ, सग्गावग्गा हलहु लहइ ।
जं जं मण भावइ तं सुह पावइ, दीणु विकासु ण भासुणइ ॥

यावंति जिनचैत्यानि, विद्यंते भुवनत्रये ।
तावंति सततं भक्त्या, त्रिःपरीत्य नमाम्यहम् ।

(इत्याशीर्वादः)

षोडशकारणपूजनम्

ऐंद्रं पदं प्राप्य परं प्रमोदं धन्यात्मतामात्मनि मन्यमानः ।
दृक्शुद्धिमुख्यानि जिनेंद्रलक्ष्म्या महाम्यहं षोडशकारणानि॥

ॐ ह्रीं दर्शनविशुद्ध्यादिषोशडकारणानि ! अत्रावतरत अवतरत संवौषट् ।

ॐ ह्रीं दर्शनविशुध्यादिषोशडकारणानि अत्र तिष्ठत तिष्ठत ठः ठः

ॐ ह्रीं दर्शनविशुद्ध्यादिषोडशकारणानि ! अत्र मम सन्निहितानि भवत भवत वषट् ।

सुवर्णभृंगारविनिर्गताभिः पानीयधाराभिरिमाभिरुच्चैः

दृक्शुद्धिमुख्यानि जिनेंद्रलक्ष्म्या महाम्यहं षोडशकारणानि ॥

ॐ ह्रीं दर्शनविशुद्धि-विनयसम्पन्नता-शीलव्रतेष्वनतीचारा-भीक्ष्ण ज्ञानोपयोग-संवेगशक्तितस्त्यागतप-साधुसमाधि-वैयावृत्य-करणा-र्हद्भक्ति-बहुश्रुतभक्ति-प्रवचनभक्ति-आवश्यकापरिहाणि-मार्गप्रभावना-प्रवचनवात्सल्येति तीर्थंकरत्वकारणेभ्यो जन्मजरामृत्यु-विनाशनाय जलं निर्वपामीति स्वाहा ।

श्रीखण्डपिंडोद्भवचन्दनेन, कर्पूरपूरैः सुरभीकृतेन ।

दृक्शुद्धिमुख्यानि जिनेंद्रलक्ष्म्याः० ॥ चंदनम् ।

स्थूलैरखंडैरमलैः सुगंधैः शाल्यक्षतैः सर्वजगन्नमस्यैः ।

दृक्शुद्धिमुख्यानि जिनेन्द्रलक्ष्म्याः० ॥ अक्षतम् ।

गुंजद्द्विरेफैः शतपत्रजातीसत्केतकीचंपकमुख्यपुष्पैः ।

दृक्शुद्धिमुख्यानि जिनेन्द्रलक्ष्म्याः० ॥ पुष्पम् ।

नवीनपक्वान्नविशेषसारैर्नानाप्रकारैश्चरुभिर्वरिष्ठैः ।

दृक्शुद्धिमुख्यानि जिनेन्द्रलक्ष्म्याः० ॥ नैवेद्यम् ।

तेजोमयोल्लासशिखैः प्रदीपैः दीपप्रभैर्ध्वस्ततमो वितानैः ।

दृक्शुद्धिमुख्यानि जिनेन्द्रलक्ष्म्याः० ॥ दीपम् ।

कर्पूरकृष्णागरुचूर्णरूपैर्धूपैर्हुताशाहुतदिव्यगंधैः ।

दृक्शुद्धिमुख्यानि जिनेन्द्रलक्ष्म्याः० ॥ धूपम् ।

सन्नालिकेरक्रमुकाम्रबीजपूगादिभिः सारफलै रसालैः ।
दृक्शुद्धिमुख्यानि जिनेन्द्रलक्ष्म्याः० ॥ फलम् ।

पानीयचंदनरसाक्षतपुष्पभोज्यसद्दीपधूपफलकल्पितमर्घपात्रं
आर्हन्त्यहेत्वमलषोडशकारणानां पूजाविधौ विमलमंगल-
मातनोतु । अर्घम् ।

[प्रत्येकार्घ ।]

यदा यदापन्नासाः स्युराकर्ण्यन्ते तदा तदा ।
मोक्षसौख्यस्य कर्तृणि कारणान्यपि षोडश ॥

[यंत्रोपरिपुष्पांजलिं क्षिपामि ।]

असत्यसहिता हिंसा मिथ्यात्वं च न दृश्यते ।
अष्टांगं यत्र संयुक्तं दर्शनं तद्विशुद्धये ॥ १ ॥

ॐ ह्रीं दर्शनविशुद्धयेऽर्घं निर्वपामीति स्वाहा ॥ १ ॥

दर्शनज्ञानचारित्रतपसां यत्र गौरवम् ।
मनोवाक्कायसंशुद्ध्या सा ख्याता विनयस्थितिः ॥२॥

ॐ ह्रीं विनयसंपन्नतायै अर्घं निर्वपामीति स्वाहा ॥ २ ॥

अनेकशीलसम्पूर्णं व्रतपञ्चकसंयुतम् ।
पंचविंशतिक्रिया यत्र तच्छीलव्रतमुच्यते ॥ ३ ॥

ॐ ह्रीं निरतिचारशीलव्रतायार्घं निर्वपामीति स्वाहा ॥ ३ ॥

काले पाठस्तथा ध्यानं शास्त्रे चिंता गुरौ नुतिः ।

यत्रोपदेशना लोके शास्त्रज्ञानोपयोगिता ॥ ४ ॥

ॐ ह्रीं अभीक्ष्णज्ञानोपयोगायार्घं निर्वपामीति स्वाहा ॥ ४ ॥

पुत्रमित्रकलत्रेभ्यः संसारविषयार्थतः ।

विरक्तिर्जायते यत्र स संवेगो बुधैः स्मृतः ॥ ५ ॥

ॐ ह्रीं संवेगायार्घं निर्वपामीति स्वाहा ॥ ५ ॥

जघन्यमध्यमोत्कृष्टपात्रेभ्यो दीयते भृशम् ।

भक्त्या चतुर्विधं दानं सा ख्याता दानसंस्थितिः ॥

ओं ह्रीं शक्तितस्त्यागायार्घं निर्वपामीति स्वाहा ।

तपो द्वादशभेदं हि क्रियते मोक्षलिप्सया ।

शक्तितो भक्तितो यत्र भवेत् सा तपसः स्थितिः ॥

ओं ह्रीं शक्तितस्तपसेऽर्घं निर्वपामीति स्वाहा ।

आर्या—मरणोपसर्गरोगादिष्टवियोगादनिष्टसंयोगात् ।

न भयं यत्र प्रविशति, साधुसमाधिः स विज्ञेयः ॥८॥

ओं ह्रीं साधुसमाधयेऽर्घं निर्वपामीति स्वाहा ।

कुष्टोदरव्यथाशूलैर्वातपित्तशिरोतिभिः ।

काशश्वासजरारोगैः पीडिता ये मुनीश्वराः ॥

तेषां भैषज्यमाहारं शुश्रूषा पथ्यमादरात् ।

यत्रैतानि प्रवर्तन्ते वैयावृत्यं तदुच्यते ॥ ९ ॥

ओं ह्रीं वैयावृत्यकरणायार्घं निर्वपामीति स्वाहा ॥

मनसा कर्मणा वाचा जिननामाचरद्वयम् ।
सदैव स्मर्यते यत्र साऽर्हद्भक्तिः प्रकीर्तिता ॥ १० ॥

ओं ह्रीं अर्हद्भक्तयेऽर्घं निर्वपामीति स्वाहा ॥

निर्ग्रन्थभुक्तिनो भुक्तिस्तस्य द्वारावलोकनम् ।
तद्भोज्यालाभता वस्तुरसत्यागोपवासना ॥
तत्पादवन्दनापूजा प्रणामो विनयो नतिः ।
एतानि यत्र जायंते गुरुभक्तिर्मता च सा ॥११॥

ओं ह्रीं आचार्यभक्तयेऽर्घं निर्वपामीति स्वाहा ॥

भवस्मृतिरनेकांतलोकालोकप्रकाशिका ।
प्रोक्ता यत्रार्हता वाणी वर्ण्यते सा बहुश्रुतिः ॥१२॥

ओं ह्रीं बहुश्रुतभक्तयेऽर्घं निर्वपामीति स्वाहा ॥

षट्द्रव्यपञ्चकायत्वं सप्ततत्त्वं नवार्थता ।
कर्मप्रकृतिविच्छेदो यत्र प्रोक्तः स आगमः ॥१३॥

ओं ह्रीं प्रवचनभक्तयेऽर्घं निर्वपामीति स्वाहा ॥

प्रतिक्रमस्तनूत्सर्गः समता वन्दना स्तुतिः ।
स्वाध्यायः पठ्यते यत्र तदावश्यकमुच्यते ॥१४॥

ओं ह्रीं आवश्यकापरिहाणयेऽर्घं निर्वपामीति स्वाहा ॥

जिनस्नानं श्रुताख्यानं गीतवाद्यं च नर्तनम् ।
यत्र प्रवर्तते पूजा सा सन्मार्गप्रभावना ॥१५॥

ॐ ह्रीं सन्मार्गप्रभावनायै अर्घं निर्वपामीति स्वाहा ॥

चारित्रगुणयुक्तानां मुनीनां शीलधारिणाम् ।
गौरवं क्रियते यत्र तद्वात्सल्यं च कथ्यते ॥१६॥

ॐ ह्रीं प्रवचनवत्सलत्वायार्घं निर्वपामीति स्वाहा ॥

जयमाला ।

भवभवहि निवारण सोलहकारण पयडमि गुणगणसायरहं ।
पणविवि तित्थंकर असुहस्वयंकर केवलणाणदिवायरहं ॥१॥

पद्धरी छन्द ।

दिढ धरहु परमदंसण विसुद्धि, मणवयणकायविरइयविसुद्धि । मा छंडहु विणउ चउ पयार, जो मुत्ति वरांगण हियहि हार ॥२॥ अणुदिणु परिपालउ सीलभेउ, जो हुत्ति हरइ संसारहेउ । णाणोपजोग जो काल गमइ, तसु तत्थियकित्ति भुवणयहि भमइ । संवेउ चाउ जे अणुसरंति, वेएण भवएणउ ते तरंति । जे चउविह दाण सुपत्त देय, ते मोहभूमि सुह मत्थ लेह ॥४॥ जे तव तवंति बारहपयार, ते मम्मासुरंदहविहवसार । जो साधुसमाधि धरंति थक्कु, सो हवइ ण काममुहंधुवक्कु ॥५॥ जो जाणइ वेयावच्चकरणु, सो होइ सव्व दोसाण हरण । जो चिंतइ मण अरिहंत देव, तसु विसय अणंतासवण खेव ॥६॥ पव्वयणसरिस जे

गुरु णमंति, चउगइसंसार ण ते भमंति । बहुसुतह भत्ति जे णर करंति, अप्पउ ग्यणत्तय ते धरंति ॥७॥ जे छह आवासइ चित्तदेइ, मा सिद्धपंथसहरत्थ लेइ । जे मग्गपहावण आइरंति, ते अहहिंसण संभवंति ॥८॥ जे पवयणकज्जसमत्थ हंति, तहं कम्म जिणंदह खवण भंति । जे वच्छलत्तु कारण वहंति, ते तित्थयरत्तउपुह लहंति ॥९॥ जे सोलह कारण कम्मवियारण जे धरंति वयसीलधरा । ते दिवि अमरेसुर पहुमि णरेसुर सिद्धवरंगण हिवहिहरा ॥

ओं ह्रीं दर्शनविशुद्धयादिषोडशकारणेभ्योऽनर्घपदप्राप्तये पूर्णार्घ्यं

एताः षोडश भावना यतिवराः कुर्वंति ये निर्मला,
स्ते वै तीर्थंकरस्य नामपदवीमायुर्लभंते कुलम् ।
चित्रं काञ्चनपर्वतेषु विधिना स्नानार्चनं देवतां,
राज्यं सौख्यमनेकधा व्रतपो मोक्षं च सौख्यास्पदम् ॥

(इत्याशीर्वाद)

दशलक्षणपूजनम् ।

उत्तमादिक्षमाद्यंतब्रह्मचर्यसुलक्षणम् ।
स्थापयेद्दशधा धर्ममुत्तमं जिनभाषितम् ॥१॥

ॐ ह्रीं उत्तमक्षमादिदशलाक्षणिकधर्म ! अत्रावतर अवतर संवौषट् अत्र तिष्ठ तिष्ठ ठः ठः । अत्र मम सन्निहितो भव भव वषट् ।

(यंत्रं स्थापयामि)

प्रालेयशैलशुचिनिर्गतचारुतोयैः, शीतैः सुगंधिसहितैर्मुनि-चित्ततुल्यैः। संपूजयामि दशलक्षणधर्ममेकं, संसारतापहननाय क्षमादियुक्तम् ॥१॥

ॐ ह्रीं उत्तमक्षमामार्दवार्जवसत्यशौचसंयमतपस्त्यागाकिंचन्यब्रह्मचर्यधर्मेभ्यो जन्मजरामृत्युविनाशनाय जलं निर्वपामीति स्वाहा।

श्रीचंदनैर्बहलकुंकुमचंद्रमिश्रैः संवासवासितदिशामुखदिव्यसंस्थैः। संपूजयामि दशलक्षणधर्ममेकं० ॥ चंदनम् ॥

शालीयशुद्धसरलामलपुण्यपुंजैः रम्यैरखंडशशिलक्षणरूपतुल्यैः संपूजयामि दशलक्षणधर्ममेकं० ॥ अक्षतम् ॥

मंदारकुंदवकुलोत्पलपारिजातैः पुष्पैः सुगंधसुरभीकृतमूर्धलोकैः। संपूजयामि दशलक्षणधर्ममेकं० ॥ पुष्पम् ॥

अत्युत्तमैः रसरसादिकमद्यजातैर्नैवेद्यकैश्च परितोपितभव्यलोकैः। संपूजयामिदशलक्षणधर्ममेकं० ॥ नैवेद्यम् ॥

दीपैर्विनाशिततमोत्करुद्धनाशैः कर्पूरवर्तिज्वलितोज्ज्वलभाजनस्थैः। संपूजयामि दशलक्षणधर्ममेकं संसारतापहननाय क्षमादियुक्तम्। दीपम्

कृष्णागरुप्रभृतिसर्वसुगंधद्रव्यैर्धूपैस्तिरोहितदिशा-मुखदिव्यधूम्रैः। सम्पूजयामि दशलक्षणधर्ममेकं संसारतापहननाय

क्षमादियुक्तम् । धूपम्

पूगीलवंगकदलीफलनालिकेरैर्हृद्घ्राणनेत्रसुखदैः शिवदानदक्षैः । सम्पूजयामि दशलक्षणधर्ममेकं संसारतापदहनाय क्षमादियुक्तम् । फलम् ।

पानीयस्वच्छहरिचन्दनपुष्पसारैः शालीयतंदुलनिवेद्यसुचन्द्रदीपैः । धूपैः फलावलिविनिर्मितपुष्पगंधैः पुष्पांजलीभिरपि धर्ममहं समर्चे ॥

ॐ ह्रीं उत्तमक्षमा-मार्दवा-र्जव-सत्य-शौचसंयमतपस्त्यागाकिंचन्य ब्रह्मचर्यधर्मेभ्यो अनर्घ्यपदप्राप्तये अर्घं निर्वपामीति स्वाहा ।

अंगपूजनम्

येन केनापि दुष्टेन पीडितेनापि कुत्रचित् ।
क्षमा त्याज्या न भव्येन स्वर्गमोक्षाभिलाषिणा ॥१॥

ॐ ह्रीं परब्रह्मणे उत्तमक्षमाधर्मांगाय जलं निर्वपामीति स्वाहा । चन्दनं निर्व० । अक्षतान् निर्व० । पुष्पं निर्व० । चरुं निर्व० । दीपं निर्व० । धूपं निर्व० । फलं निर्व० । अर्घं निर्वपामीति स्वाहा ॥

उत्तमखममद्दउ अज्जउ सच्चउ पुण सउच्च संजम सुतऊ ।
चाउवि आकिंचणु भवभयवंचणु बंभचेरु धम्मजु अखऊ ।१।

